Bhava Bhuti
Uttara-
Rāma
Bhanap
1888

Ind L 740.5
Bh 4
Bhanap
Subodha Prakāśa
Press
652

उत्तररामचरितम् ।

Price 1¼ Rupee.

Digitized by Google

THE

UTTARARÂMACHARITA

A SANSKRIT DRAMA

BY

BHAVABHÛTI.

EDITED WITH ENGLISH NOTES

BY

SHRÎNIVÂS GOVIND BHÂNAP.

PRINTED AT THE

SUBODHA-PRAKASHA PRESS.

Registered under Act XXV of 1867.

Bombay:

1888

Price 1¼ Rupee.

Digitized by Google

IndL 740.5

CHARLES [illegible] LANHAM
MARCH 15, 1941

Digitized by Google

अथ

उत्तररामचरितम् ।

महाकविश्रीभवभूतिविरचितम्

भानपाभिधेन गोविन्दात्मजेन श्रीनिवासनाम्ना

आङ्गलभाषाटिप्पण्या समेतं संस्कृतम् ।

तच्च

मुम्बय्यां

सुबोधप्रकाशयन्त्रालये मुद्रितम् ।

शकाब्दाः १८१०

मूल्यं सपादरूपकः ।

Digitized by Google

Digitized by Google

PREFACE.

The Uttararámacharita takes a very high rank in Sanskrit dramatic literature. It is an historical play of surpassing merit. It reflects in all its beauty the loftiest type of Âryan life at one of the highest and most glorious epochs in the history of Âryan India; and in no work that we know of, do we find depicted in more impressive colours the conflict of generous human feelings in elevated spheres of life and duty.

2. The holy story of Râma's life on earth, immortalized by the inspired muse of Vâlmîki—a story so full of touching and stirring incidents, so awful yet so lively, so sublime, yet so simple, which still after the lapse of more than five and twenty centuries serves to move the fervid enthusiasm of millions upon millions in this land of the Âryas—this story of Râmâyana supplies in its concluding portions the frame-work on which the plot of this play is based; and it is worth remarking, as illustrating the strictly historical character of the play, that there is nowhere any deviation from the main lines of this story, except at the close, where, agreeably to the laws of Sanskrit dramatic composition, the author avoids the tragic end, and concludes with a happy scene,—painted in a few fine touches—the reunion, after all the varied changes and chances of time, of Râma and Sîtâ and their sons.

3. The hero of the play is the hero of Vâlmîki's Râmâyana—Shrî-Râmachandra, son of Das'aratha—the hero-god enshrined in the pious heart of the Âryan nation, realising in its sublimity of type the ancient Âryan ideal of private and public virtue, while the heroine is Sîtâ, his queen, representing in all its tender grace, the Âryan ideal of womanly virtue. The other characters, too, are all lofty—the Rishis and Rajarshis, the Tapasas and Tapasîs, universally held in pious reverence. The whole movement of the play is, accordingly, altogether on an elevated plane, which allows no room for

Digitized by Google

evity, much less for obscenity of language, which so often disfigures even some of the finest plays of Shakespeare. There is here no buffoon—no character like the Falstaff of Shakespeare. Even the lowest character, Durmukha (foul-tongued)—the despised and hated of all Ayodhyâ, but the trusted spy of Râma—is painted as a high-souled public servant, who does his duty he owes to his royal master though with the greatest pain and reluctance.

4. The ruling sentiment of the play is *karunarasa i. e.* deep pathos. The other *rasas* or sentiments, to be met with in sanskrit dramatic compositions, are not neglected. We have particularly *Shringârarasa* (love) and *Vîrarasa* (heroism) brought out in some measure, the one in the first and third acts and the beginning of the sixth, and the other in the fifth; the rest occur only in isolated places as occasion suggests; but all are subordinated to the predominant sentiment of deep, tender pathos and serve only—so skilful is the arrangement of the play—to illustrate and embellish it: and indeed the stanza, which the poet puts in the mouth of Tamasâ at the end of Act III in regard to Sîtâs frame of mind, is suggestive, and supplies the key to the character of the whole play.

एको रसः करुण एव निमित्तभेदाद्
भिन्नः पृथक् पृथगिवाश्रयते विवर्तान् ।
आवर्तबुद्बुदतरङ्गमयान् विकारा-
नम्भो यथा सलिलमेव तु तत्समग्रम् ॥

The whole style also, is made to harmonize with this *rasa*—words, phrases, expressions, figures, tropes, all; even the aid of metre is not neglected. The play is the work of a master-hand and by the concurrent judgment of scholars, stands unrivalled in the whole range of Sanskrit dramatic literature for its successful portraiture of the *pathetic* side of human nature.

5. The author of the Uttararâmacharita is Bhavabhûti, regarded as one of the greatest dramatic writers in this country. He certainly enjoyed a high reputation even in his own day for his classical learning and genius

Digitized by Google

and was honored by his contemporaries with the title of श्रीकण्ठ as one "यं ब्रह्माणमियं देवी वाग्वश्येवानुवर्तते." As is generally the case with most of our Sanskrit writers, little or nothing is known about Bhavabhûti's life beyond what he himself gives us in the prefatory part of the Mahâvîracharita and this play. In the Mahâvîracharita, we read:—

अस्ति दक्षिणापथे पद्मपुरं नाम नगरं । तत्र केचित्तैत्तिरीयिणः काश्यपाश्चरणगुरवः पंक्तिपावनाः पञ्चाग्नयो धृतव्रताः सोमपीथिन उद्डम्बरा ब्रह्मवादिनः प्रतिवसन्ति। तदामुष्यायणस्य तत्रभवतो वाजपेयवाजिनो महाकवेः पञ्चमः सुगृहीतनाम्नो भट्टगोपालस्य पौत्रः पवित्रकीर्तेर्नीलकण्ठस्यात्मसंभवः श्रीकण्ठपदलाञ्छनो भवभूतिर्नाम जातूकर्णीपुत्रः कविः ।

श्रेष्टः परमहंसानां महर्षीणामिवाङ्गिराः ।
यथार्थनामा भगवान् यस्य ज्ञाननिधिर्गुरुः ॥

"There is in the southern country (viz. Vidarbhas' or modern Berars) a city named Padmapura; in it dwell certain pious Brâhmans of Kâs'yapa gotra or family, surnamed the Uddambaras, followers of the Taittirîya branch of the Yajurveda, chiefs of their schools, keeping the five fires, observing vows, drinking the Soma, and repeating the Vedas. An illustrious descendant of these was one named Mahâkavi or great poet, the performer of the Vâjapeya sacrifice and fifth in order of whom was our poet Bhavabhúti, also styled Shrîkantha. He was the grandson of one whose well-chosen name was Bhatta Gopâl and the son of Nîlakantha of pure name. His mother's name was Jatûkarnî.

His preceptor was Jnânanidhi of significant name, the chief of all *Sanyâsis*, as the sage Angiras is of the Maharshis."

6. Of Bhavabhûti's works three alone are now extant viz. The Mahâvîracharita, the Mâlatî-Mádhava and the Uttararámacharita. It is believed that there is also a

How unclear!

Digitized by Google

fourth work of the poet and it is to be hoped that it will one day be discovered. The first two works are considered by the critics to be inferior in merit to the third the Uttararâmacharita, and internal evidence in respect of style, structure, and dramatic effect confirms the view that they are also the earlier efforts of the poet in point of date and the Uttararámcharita is justly suggested, in the last benedictory stanza, as **परिणतप्रज्ञस्य वाणी** (i. e the product of the author's ripened genius) for such is the **ध्वन्यर्थ** there. The Mahávîracharita is probably the first and earliest attempt of Bhavabhûti at dramatic verse. It is also an historical play like the Uttararámcharita and frames its plot on the same story of the Ramáyana taking it up at a point where Ráma goes to the Dandaká forest with Vis'vámitra and concluding with the destruction of Rávana and the return of Ráma to his Capital Ayodhyá amidst the rejoicings of his subjects. The sentiment of the play is *Vîrarasa* or heroism and is brought out with great skill and effect. The sequel of this story contained in the Uttarakánda of the Rámáyana forms the ground-work, as remarked before, of his third work, the Uttararámacharita, illustrating the sentiment of pathos. The Málatî-Mádhava is a love-play; the plot is entirely original; and the chief sentiment of it is *S'ringâra.*

7. Tradition makes Bhavabhûti a contemporary of Kálidása; but internal and other evidence is against this view. Bhavabhûti's works clearly belong to a later period in the history of Sanskrit literature, when a new style of composition was forming—particularly in the department of descriptive prose. It is the period of Subandhu, Dandî and Bána, and Bhavabhûti's prose, as far as we have it in these plays, bears a marked resemblance to that of the Vásavadattá, Das'akumámarcharita and Kádambarí and even in his verse, charming though it is, it must be said that we often miss the simple grace and natural flow of the Sa'kuntalâ. He evidently belongs to

Digitized by Google

a school of writers with whom समासभूयस्त्वं (i. e. richness of compounds) is the very soul of elegant style; and Dr. Bhandárkar on this ground, as well as on the strength of other evidence, such as, the omission of his name in the Hars'acharita by Bâna, places him at the end of the 7th and the beginning of the 8th century. Our poet thus comes upon the swelling tide of the great intellectual movement of the Âryan-revival, under the auspices of the later Guptas, initiated by Gaudapâda and Kumarîla after the overthrow of the Bauddhas; and in his works he gives indications of a reviving healthy tone of thought —so characteristic of that movement. And we seem almost to hear the echoes of the Âcharya period when we read the proud defiance he hurls at his critics in the following stanza of Mâlatî-Mâdhava Act I.

700 A.D.

ये नाम केचिदिह नः प्रथयन्त्यवज्ञां
जानन्ति ते किमपि तान्प्रति नैष यत्नः ।
उत्पत्स्यतेऽस्ति मम कोऽपि समानधर्मा
कालोह्ययं निरवधिर्विपुला च पृथ्वी ॥

8. Bhavabhûti is often compared with Kâlidâsa, and opinions differ as to their comparative merits as dramatists. Bhavabhûti, indeed, seems to take Kâlidâsa for his model and borrow ideas and images from his works, but we share the view of the Pandits that as a poet of human feeling, judging from the Uttar-râmacharita, he, beyond doubt, surpasses his great exemplar, as justly said उत्तरे रामचरिते भवभूतिर्विशिष्यते । His skill in bringing out the sentiment of pathos particularly, and in adapting his style to occasion and incident, is admittedly unrivalled. His words, his metres, his forms, and his images—all go straight to the heart and make even 'stones weep' as Govardhandâsa in his Âryâ-Saptas'atî says :—

भवभूतेः संबन्धाद्भूधरभूरेव भारती भाति ।
एतत्कृतकारुण्ये किमन्यथा रोदिति ग्रावा ॥

Digitized by Google

No less successful does he appear to us in his paintings of natural scenery! What can be more graphic and picturisque than his descriptions of the Dandakâ forest and Janasthâna at the close of the second Act? As Dr. Bhándârker observes, "He shews a just appreciation of the awful beauty and grandeur of Nature enthroned in the solitudes of dense forests, cataracts, and lofty mountains. He has an equally strong perception of stern grandeur in human character and is very successful in bringing out deep pathos and tenderness." And further, in our opinion, even as an artist, he is in no way inferior to Kâlidâsa or any other poet in vigour of fancy, originality of conception and power of expression.

गुणदोषौ बुधो गृह्णात्यिन्दुक्षीडाविवेश्वरः ।
शिरसा श्लाघते पूर्वं परं कण्ठे नियच्छति ॥

S. G. B.

Digitized by Google

अथ

उत्तररामचरितम्

नाम

नाटकम्।

इदं कविभ्यः[1] पूर्वेभ्यो नमोवाकं प्रशास्महे।
विन्देम देवतां वाचममृतामात्मनः कलाम्॥ १॥

नान्द्यन्ते

सूत्रधारः। अलमति विस्तरेण। अद्य खलु भगवतः कालप्रियनाथस्य यात्रायामार्यमिश्रान् विज्ञापयाम्येवमत्रभवन्तो विदांकुर्वन्तु। अस्ति खलु तत्रभवान् काश्यपः श्रीकण्ठपदलाञ्छनः[2] पदवाक्यप्रमाणतत्वज्ञो भवभूतिर्नाम जातूकर्णीपुत्रः।

यं ब्रह्माणं[3] मियं देवी वाग्वश्येवानुवर्तते।
उत्तरं रामचरितं तत्प्रणीतं प्रयोक्ष्यते[4]॥ २॥

एषोऽस्मि कार्यवशादायोध्यिकस्तदानीन्तनश्च संवृत्तः। (समन्तादवलोक्य) भो भो यदि[5] तावदत्र भवतः पौलस्त्यकुलधूमकेतोर्महाराजरामस्यायमभिषेकसमयो रात्रिन्दिवमसंहृतानन्दनान्दीकस्तत्किमद्य विश्रान्तचारणानि चत्वरस्थानानि।

---

१ गुरुभ्यः।
२ श्रीकण्ठपदलाञ्छनोभवभूतिनाम।
३ ब्राह्मणं।
४ प्रयुज्यते.
५ यदा तावत्तत्रभवतः।

Digitized by Google

प्रविश्य

नटः । भाव प्रेषिताहीतः स्वगृहान् महाराजेन लङ्का-समरसुहृदो महात्मानः प्लवङ्गराक्षसाः सभाजनोपस्थायिनश्च नानादिगन्तागता ब्रह्मर्षयो राजर्षयश्च । यदाराधनायैतावेतो दिवसानुत्सव आसीत् । संप्रति हि

वसिष्ठाधिष्ठिता देव्यो गता रघवमातरः ।
अरुन्धतीं पुरस्कृत्य यज्ञे जामातुराश्रमम् ॥ ३ ॥

सूत्रधारः । वैदेशिकोऽस्मीति पृच्छामि कः पुनरसौ जामाता ।

नटः । कन्यां दशरथो राजा शान्तां नाम व्यजीजनत् ।
अपत्यकृतिकां राज्ञे लोमपादाय यां ददौ ॥४॥

विभाण्डकसुतस्तामृष्यशृङ्ग उपयेमे । तेन च सांप्रतं द्वादशवार्षिकं सत्रमारब्धम् । तदनुरोधात्कठोरगर्भामपि वधूं जानकीं विमुच्य गुरुजनस्तत्र गत इति ।

सूत्रधारः । तत्किमनेनैहि राजद्वारमेव स्वजातिसमयेनोपतिष्ठावः ।

नटः । तेन हि निरूपयतु राज्ञः सुपरिशुद्धामुपस्थानस्तोत्रपद्धतिं भावः ।

सूत्रधारः । मारिष

सर्वथा व्यवहर्तव्यं कुतोह्यवचनीयता ।
यथा स्त्रीणां तथा वाचां साधुत्वे दुर्जनो जनः ॥५॥

नटः । अतिदुर्जन इति वक्तव्यम् ।

---

१ सभाजनोपस्थायिनो । समाजोपस्थायिनः ।
२ नानादिगन्तपावनाः ।
३ महर्षयः ।
४ इयतो ।
५ रामस्य मातरः ।
६ व्यवहर्तव्ये ।

Digitized by Google

देव्यामपि हि वैदेह्यां सापवादो यतो जनः ।
रक्षोगृहे स्थितिर्मूलमाग्निशुद्धौ त्वनिश्चयः ॥ ६ ॥

सूत्रधारः । यदि पुनरियं किंवदन्ती महाराजं प्रति स्यात्ततोऽतिकष्टं स्यात् ।

नटः । सर्वथर्षयो देवताश्च श्रेयो विधास्यन्ति । (परिक्रम्य) भो भोः केदानीं महाराजः । (आकर्ण्य) एवं जनाः कथयन्ति

स्नेहात्सभाजयितुमेत्य दिनान्यमूनि
नीत्वोत्सवेन जनकोऽद्य गतो विदेहान् ।
देव्यास्ततो विमनसः परिसान्त्वनाय
धर्मासनाद्विशति वासगृहं नरेन्द्रः ॥ ७ ॥

(इति निष्क्रान्तौ)

प्रस्तावना ।

(ततः प्रविशत्युपविष्टो रामः सीताच)

रामः । देवि वैदेहि समाश्वसिहि ते हि गुरवो न शक्नुवन्ति विमोक्तुमस्मान्

किन्त्वनुष्ठाननित्यत्वं स्वातन्त्र्यमपकर्षति ।
सङ्कटा ह्याहिताग्नीनां प्रत्यवायैर्गृहस्थता ॥ ८ ॥

---

१ देव्या अपिहि वैदेह्याः ।
२ रक्षोगृहस्थितिर्मूलं ।
३ महाराजं स्पृशेत् ।
४ सर्वथा देवा ऋषयश्च स्वस्ति करिष्यन्ति ।
५ न ते हि गुरवाश्चिरं शक्नुवन्त्यस्मान् विमोक्तुम् वियोक्तुम् ।
६ अनुष्ठाननित्यत्वात् ।

Digitized by Google

सीता । जाणामि अज्जउत्त जाणामि किन्दु सन्दावआरिणो गुरुअणस्स विप्पओआ होन्ति (जानामि आर्यपुत्र जानामि किन्तु सन्तापकारिणो गुरुजनविप्रयोगा भवन्ति)

रामः। एवमेतत्। एते हि हृदयमर्मच्छिदः संसारभावा येभ्यो बीभत्समानाः सन्त्यज्य सर्वान् कामानरण्ये विश्राम्यन्ति मनीषिणः।

प्रविश्य

कञ्चुकी। रामभद्र। (इत्यर्द्धोक्ते साशङ्कम्) महाराज।

रामः। (सस्मितम्) आर्य ननु रामभद्र इत्येव मां प्रत्युपचारः शोभते तातपरिजनस्य तत् यथाभ्यस्तमभिधीयताम्।

कञ्चुकी। देव ऋष्यशृङ्गाश्रमादष्टावक्रः सम्प्राप्तः।

सीता। अज्ज तदो किं विलम्बिअदि (आर्य ततः किं विलम्ब्यते)।

रामः। त्वरितं प्रवेशय।

कञ्चुकी। (निष्क्रांतः)

प्रविश्य

अष्टावक्रः। स्वस्ति वाम्।

रामः। भगवन्नभिवादय इत आस्यताम्।

सीता। णमोदे। अवि कुसलं मे सअलगुरुअणस्स अज्जाएअ सन्ताए (नमस्ते। अपि कुशलं मे सकलगुरुजनस्य आर्यायाश्च शान्तायाः)।

---

१ बन्धुअणविप्पओआ।
२ भिदः।
३ सत्यज्य सर्वानरण्ये मनीषिणो विश्राम्यन्ति।
४ तातपादपरिजनस्य।
५ यथाभ्यासमुच्यताम्।
६ अभिवादये।
७ अवि कुसलं सजामातुअस्स गुरुजणस्स अज्जाऐ सन्ताए अ। आपि कुसलं समग्गस्स ममगुरुजणस्स।

Digitized by Google

रामः। अपि निर्विघ्नः सोमपीती आवुत्तो मे भगवान् ऋष्यशृङ्ग आर्या च शान्ता।

सीता। अह्मे वा सुमरइ (अस्मान् वा स्मरति)।

अष्टावक्रः। (उपविश्य) अथकिम्। देवि भगवान् वसिष्ठस्त्वामाह

विश्वम्भरा भगवती भवतीमसूत
राजा प्रजापतिसमो जनकः पिता ते।
तेषां वधूस्त्वमसि नन्दिनि पार्थिवानां
येषां कुलेषु सविता च गुरुर्वयं च ॥ ९ ॥

तत् किमन्यदाशास्महे केवलं वीरप्रसवा भूयाः।

रामः। अनुगृहीताः स्मः।

लौकिकानां हि साधूनामर्थं वागनुवर्तते।
ऋषीणां पुनराद्यानां वाचमर्थोऽनुधावति ॥१०॥

अष्टावक्रः। इदं च भगवतारुन्धत्या देवीभिः शान्तया च भूयोभूयः सन्दिष्टं यःकश्चिद्गर्भदोहदोऽस्याः सोऽवश्यमचिरात् सम्पादयितव्य इति।

रामः। क्रियते यद्येषा कथयति।

अष्टावक्रः। ननान्दुः पत्याच देव्याः सन्दिष्टमृष्यशृङ्गेण वत्से कठोरगर्भेति नानीताऽसि वत्सोऽपि रामभद्रस्त्वद्विनोदार्थमेव स्थापितः। तत् पुत्रपूर्णोत्सङ्गामायुष्मतीं द्रक्ष्याम इति।

रामः। (सहर्षलज्जास्मितम्) तथास्तु। भगवता वसिष्ठेन न किञ्चिदादिष्टोऽस्मि।

---

१ देवि कुलगुरुर्भगवान् वसिष्ठस्त्वामिदमाह।
२ गृहेषु। कुलेच।
३ सोऽचिरात् सम्पादयितव्यः।
४ भगवता वसिष्ठेन किञ्चिदादिष्टोऽस्मि।

Digitized by Google

अष्टावक्रः । श्रूयताम्

जामातृयज्ञेन वयं निरुद्धास्त्वं बाल एवासि नवं च राज्यम् ।
युक्तःप्रजानामनुरञ्जनेस्यास्तस्माद्यशो यत्परमं धनं वः ॥

रामः । यथाह भगवान् मैत्रावरुणिः ।

स्नेहं दयां तथा सौख्यं यदिवा जानकीमपि ।
आराधनाय लोकस्य मुञ्चतो नास्ति मे व्यथा ।१२।

सीता । अदो एव राहवकुलधुरन्धरो अज्जउत्तो ।
(अत एव राघवकुलधुरन्धर आर्यपुत्रः) ।

रामः । कः कोऽत्र भो विश्राम्यतामष्टावक्रः ।

अष्टावक्रः । (उत्थाय परिक्रम्य च) अये कुमारलक्ष्मणः प्राप्तः । (इति निष्क्रान्तः)

प्रविश्य

लक्ष्मणः । जयति जयत्वार्यः । आर्य तेन चित्रकारेणास्मदुपदिष्टमार्यस्य चरितमस्यां वीथिकायामभिलिखितम् । तत्पश्यात्वार्यः ।

रामः । जानासि वत्स दुर्मनायमानां देवीं विनोदयितुम् । तत् कियन्तमवधिं यावत् ।

लक्ष्मणः । यावदार्याया हुताशने विशुद्धिः ।

रामः । शान्तम् ।

उत्पत्तिपरिपूतायाः किमस्याः पावनान्तरैः ।
तीर्थोदकं च वन्हिश्च नान्यतः शुद्धिमर्हतः ॥१३॥

देवि देवयजनसम्भवे प्रसीद एषते जीवितावधिः प्रवादः

---

१ स्नेहं दयां च सौख्यंच । | २ लोकानां ।

Digitized by Google

कष्टं[1] जनः कुलधनैरनुरञ्जनीय-
स्तन्मे[2] यदुक्तमशिवं नहि तत्क्षमं ते ।
नैसर्गिकी सुरभिणः कुसुमस्य सिद्धा
मूर्ध्नि स्थितिर्न चरणैरवताडितानि[3] ॥ १४ ॥

सीता । होदु अज्जउत्त होदु एहि पेक्खह्म दाव दे चरिदं (भवत्वार्यपुत्र भवत्वेहि प्रेक्षावहे तावत् ते चरितम्) ।

(उत्थाय परिक्रामतः)

लक्ष्मणः । इदं तदालेख्यम्) ।

सीता । (निर्वर्ण्य) के एदे उवरि णिरन्तरट्ठिदा उवत्थुवन्ति विअ अज्जउत्तं । (क एते उपरि निरन्तरस्थिता उपस्तुवन्तीवार्यपुत्रम्) ।

लक्ष्मणः । एतानि तानि सरहस्यजृम्भकास्त्राणि यानि भगवतः कृशाश्वात् कौशिकमृषिमुपसंक्रांतानि तेन ताटकावधे प्रसादीकृतान्यार्यस्य ।

रामः । वन्दस्व देवि दिव्यास्त्राणि

ब्रह्मादयो ब्रह्महिताय तप्त्वा परः सहस्राः शरदस्तपांसि ।
एतान्यपश्यन् गुरवः पुराणाः स्वान्येव तेजांसि तपोमयानि

सीता । णमो एदाणं । (नम एतेभ्यः) । ॥१५॥

रामः । सर्वथेदानीं त्वत्प्रसूतिमुपस्थास्यन्ति ।

सीता । अणुग्गहीदम्हि । (अनुगृहीताऽस्मि) ।

लक्ष्मणः । एष मिथिलावृत्तान्तः ।

---

१ कष्टं ।
२ तन्मो यदुक्तमशिवं न तु तत्क्षमं ते । तन्मे दुरुक्तमशिवं ।
३ अवताडनानि ।
४ तावद् ।
५ कौशिकमृषिं विश्वस्य मित्रं विश्वामित्रमुपसंक्रान्तानि ।

Digitized by Google

सीता । अम्महे दलण्णवणीलुप्पलसामलसिणिद्धमसिणसोहमाणमंसलेण देहसोहग्गेण विम्हअत्थिमिदताददीसमाणसोम्मसुन्दरसिरी अणादरस्खुडिदसंकरसरासणो सिहण्डमुद्धमुहमण्डलो अज्जउत्तो आलिहिदो । (अम्महे दलन्नवनीलोप्पलश्यामलस्निग्धमसृणशोभमानमांसलेन देहसौभाग्येन विस्मयस्तिमिततातदृश्यमानसौम्यसुन्दरश्रीरनादरखण्डितशंकरशरासनः शिखण्डमुग्धमुखमंडल आर्यपुत्र आलिखितः) ।

लक्ष्मणः । आर्ये पश्य पश्य

सम्बन्धिनो वसिष्ठादीनेष तातस्तवार्चति ।
गौतमश्च शतानन्दो जनकानां पुरोहितः ॥ १६ ॥

रामः । द्रष्टव्यमेतत्

जनकानां रघूणां च सम्बन्धः कस्य न प्रियः ।
यत्र दाता ग्रहीता च स्वयं कुशिकनन्दनः ॥१७ ॥

सीता । एदे क्खु तक्कालकिदगोदाणमङ्गला चत्तारो भादरो विआहदिक्खिदा तुह्मे । आह्मो जाणामि तस्मिं एव पदेसे तस्मिं एव काले वत्तामि । (एते खलु तत्कालकृतगोदानमङ्गलाश्चत्वारो भ्रातरो विवाहदीक्षिता यूयम् । अहो जानामि तस्मिन्नेव प्रदेशे तस्मिन्नेव काले वर्ते) ।

रामः । समयः स वर्तत इवैष यत्र मां
समनन्दयत् सुमुखि गौतमार्पितः ।
अयमार्द्रगृहीतकमनीयकङ्कण-
स्तव मूर्तिमानिव महोत्सवःकरः ॥ १८ ॥

लक्ष्मणः । इयमार्या । इयमप्यार्या माण्डवी । इयमपि वधूः श्रुतकीर्तिः ।

---

१ अणाआस खुडिद । | २ उद्गृहीत ।

Digitized by Google

सीता। वच्छ इअं वि अवरा का (वत्स इयमप्यपरा का)।

लक्ष्मणः। (सलज्जस्मितमपवार्य)। अये ऊर्मिलां पृच्छसार्या। भवत्वन्यतः सञ्चारयामि। (प्रकाशम्) आर्ये इदृश्यतां द्रष्टव्यमेतत्। अयं च भगवान् भार्गवः।

सीता। (ससंभ्रमम्) भीद म्हि (भीताऽस्मि)।

रामः। ऋषे नमस्ते।

लक्ष्मणः। आर्ये पश्य पश्य। अयमसावार्येण (इत्यर्द्धोक्ते)

रामः। (साक्षेपम्) वैत्स बहुतरं द्रष्टव्यमस्ति। अन्यतो दर्शय।

सीता। (सस्नेहबहुमानं निर्वर्ण्य) सुट्ठु सोहसि अज्जउत्त एदिणा विणअमाहप्पेण (सुष्ठु शोभसे आर्यपुत्र एतेन विनयमाहात्म्येन)।

लक्ष्मणः। एते वयमयोध्यां प्राप्ताः।

रामः। (साक्षम्) स्मरामि हन्त स्मरामि

जीवत्सु तातपादेषु नवे दारपरिग्रहे।
मातृभिश्चिन्त्यमानानां ते हि नो दिवसा गताः॥१९॥

इयमपि तदा जानकी

प्रतनुविरलैः प्रान्तोन्मीलन्मनोहरकुन्तलै-
र्दशनमुकुलैर्मुग्धालोकं शिशुर्दधती मुखम्।
ललितललितैर्ज्योत्स्नाप्रायैरकृत्रिमविभ्रमै-
रकृत मधुरैरम्बानां मे कुतूहलमङ्गकैः॥ २०॥

लक्ष्मणः। एषा मन्थरा।

---

१ कम्पिदम्हि (कम्पितास्मि)
२ Some copies omit this speech of Rama.
३ अयि।

Digitized by Google

रामः। (अनुत्तरमन्यतो दर्शयन्[1]) देवि वैदेहि

इंगुदीपादपः सोऽयं शृङ्गवेरपुरे पुरा।
निषादपतिना यत्र स्निग्धेनासीत्[2] समागमः॥२१॥

लक्ष्मणः। (विहस्य स्वगतम्) अये मध्यमाम्बावृत्तान्तोऽन्तरित आर्येण।

सीता। अह्मो एसो जडासञ्जमणवुत्तन्तो। (अहो एष जटासंयमनवृत्तान्तः)।

लक्ष्मणः।

पुत्रसंक्रान्तलक्ष्मीकैर्यद्वृद्धेक्ष्वाकुभिर्धृतैम्[3]।
धृतं बाल्ये तदार्येण पुण्यमारण्यकं व्रतम्॥ २२॥

सीता। एसा पसण्णपुण्णसलिला भअवदी भाईरही (एषा प्रसन्नपुण्यसलिला भगवती भगीरथी)

रामः। देवि रघुकुलदेवते नमस्ते।

तुरगविचयव्यग्रानुर्वीभिदः सगराध्वरे
कपिलमहसामर्षात् प्लुष्टान् पुरा प्रपितामहान्।
अगणिततनूपातं[4] तप्त्वा तपांसि भगीरथो
भगवति तव स्पृष्टानद्भिश्चिरादुददीधरत्[5]॥ २३॥

सा त्वमम्ब स्नुषायामरुन्धतीव सीतायां शिवानुध्यानपराभव।

लक्ष्मणः। अयमसौ भरद्वाजावेदितश्चित्रकूटयायिनि वर्त्मनि वनस्पतिः कालिन्दीतटवटः[6] श्यामोनाम।

सीता। सुमरइ वा एवं पदेसं अज्जउत्तो (स्मरतीवैतं प्रदेशमार्यपुत्रः)।

---

१ सत्वरमन्यतो दर्शयन्। अनुत्तरमन्यतोगत्वा।
२ वृत्तमन्तरितमार्येण
३ कृतम।
४ पितुः।
५ तनूतापम्।
६ तटे वटः।

Digitized by Google

रामः। आर्ये कथं विस्मर्यते।

अलसकुलितमुग्धान्यध्वसञ्जातखेदा-
दशिथिलपरिरम्भैर्दत्तसंवाहनानि।
परिमृदितमृणालीदुर्बलान्यङ्गकानि
त्वमुरसि मम कृत्वा यत्र निद्रामवाप्ता ॥ २४ ॥

लक्ष्मणः। एष विन्ध्याटवीमुखे विराधसंरोधः।

सीता। अलं दाव एदिणा। पेक्खामि दाव अज्जउत्तहत्थधरिदतालवुंतादवत्तनिवारिदादपं अत्तणो दक्खिणारण्णप्पवेसारम्भं। (अलं तावदेतेन। प्रेक्षे तावदार्यपुत्रहस्तधृततालवृन्तातपत्रनिवारितातपमात्मनो दक्षिणारण्यप्रवेशारम्भम्)।

रामः।

एतानि तानि गिरिनिर्झरिणीतटेषु
वैखानसाश्रिततरूणि तपोवनानि।
येष्वातिथेयपरमाः शमिनो भजन्ते
नीवारमुष्टिपचना गृहिणो गृहाणि ॥ २५ ॥

लक्ष्मणः। अयमविरलानोकहनिवहनिरन्तरस्निग्धनीलपरिसरारण्यपरिणद्धगोदावरीमुखरकन्दरः सततमभिष्यन्दमानमेघमेदुरितनीलिमा जनस्थानमध्यगो गिरिः प्रस्रवणः।

रामः। स्मरसि सुतनु तस्मिन् पर्वते लक्ष्मणेन
प्रतिविहित सपर्यास्वस्थयोस्तान्यहानि।
स्मरसि सरसतीरां तत्र गोदावरीं वा
स्मरसि च तदुपान्तेष्वावयोर्वर्तनानि ॥ २६ ॥

---

१ संवादः
२ अज्जउत्तहत्थधरिदतालवुंतादवत्तं आत्तणो (आर्यपुत्रहस्तधारितातालवृन्तातपत्रमात्मनो)।
३ सुस्थयोः।
४ सुरसनीरां।

Digitized by Google

अपिच

किमपि किमपि मन्दं मन्दमासत्तियोगा-
दविरलितकपोलं जल्पतोरक्रमेण ।
अशिथिलपरिरम्भव्यापृतैकैकदोष्णो-
रविदितगतयामा रात्रिरेव व्यरंसीत् ॥ २७ ॥

लक्ष्मणः । एषा पञ्चवट्यां शूर्पणखा ।

सीता । हा अज्जउत्त एत्तिअं [1]दे दंसणं (हा आर्यपुत्रैतावत् ते दर्शनम्) ।

रामः । अयि विप्रयोगत्रस्ते चित्रमेतत् ।

सीता । जहा तहा होदु दुज्जणो असुहं उप्पादेइ (यथा तथा भवतु दुर्जनोऽसुखमुत्पादयति) ।

रामः । हन्त वर्तमान इव जनस्थानवृत्तान्तः प्रतिभाति ।

लक्ष्मणः ।

अथेदं रक्षोभिः कनकहरिणच्छद्मविधिना
तथा वृत्तं पापैर्व्यथयति यथा क्षालितमपि ।
जनस्थाने शून्ये विकलकरणैरार्यचरितै-
[2]रपिं ग्रावा रोदित्यपि दलति वज्रस्य हृदयम् ॥२८॥

सीता । (सास्रमात्मगमम्) अयि देव रहुउलाणन्द एवं मम कारणादो किलिट्ठोसि (अयि देव रघुकुलानन्द एवं मम कारणात् क्लिष्टोसि)

लक्ष्मणः । (रामं निर्वर्ण्य साकूतम्) आर्य किमेतत्

अयं ते बाष्पौघस्त्रुटित इव मुक्तामणिसरो
विसर्पन् धाराभिर्लुठति धरणीं जर्जरकणः ।

---

१ एत्तिअं ज्जेव दंसणं (एतावदेव दर्शनम्) ।

२ करुण करुणैरार्यचरितैः ।

Digitized by Google

निरुद्धोऽप्यावेगः स्फुरदधरनासापुटतया
परेषामुन्नेयो भवति च भराध्मातहृदयः ॥ २९ ॥

रामः। वत्स

तत्कालं प्रियजनविप्रयोगजन्मा
तीव्रोऽपि प्रतिकृतिवाच्छया विसोढः।
दुःखाग्निर्मनसि पुनर्विपच्यमानो
हृन्मर्मव्रण इव वेदनां करोति ॥३०॥

सीता। हद्धी हद्धी अहं वि अदिभूमिं गदेण रण-रणएण अज्जउत्तसुण्णं विअ अत्ताणं पेक्खामि (हा धिक् हा धिक् अहमप्यतिभूमिंगतेन रणरण्यकेनार्यपुत्रशून्यमिवात्मानं प्रेक्षे)।

लक्ष्मणः। (स्वगतम्) भवत्वन्यतः क्षिपामि। (चिंत्र विलोक्य प्रकाशम्) तदेतन्मन्वन्तरपुराणगृध्रराजस्य तत्र भवतस्तातजटायुषश्चरित्रविक्रमोदाहरणम्।

सीता। हा ताद णिव्वूढो दे अवच्च सणेहो (हातात निर्व्यूढस्तेऽपत्यस्नेहः)।

रामः। हा तात काश्यप शकुन्तराज क्व पुनस्त्वादृशस्य महतस्तीर्थस्य साधोः सम्भवः।

लक्ष्मणः। अयमसौ जनस्थानपश्चिमश्चित्रकुञ्जवान् नाम दनुकबन्धाधिष्ठितो दण्डकारण्यभागः। तदिदमृष्यमूकपर्वते मतङ्गस्याश्रमपदम्। इयं च श्रमणा नाम सिद्धशबरी। तदेतत् पम्पाभिधानं सरः।

सीता। एत्थ किल अज्जउत्तेण विसज्जिदामारिसधीरत्तणं पमुक्ककण्ठं रुण्ण आसि (अत्र किल आर्यपुत्रेण विसृष्टामर्षधैर्यं प्रमुक्तकण्ठं रुदितमासीत्)।

---

१ चिराध्मातहृदयः। भवति विरसाध्मातहृदयः।

Digitized by Google

रामः । देवि रमणीयमेतत् सरः

एतस्मिन् मदकलमल्लिकाल्पपक्ष-
व्याधूतस्फुरदुरुदण्डपुण्डरीकाः ।
बाष्पाम्भः परिपतनोद्गमान्तराले
संदृष्टाः कुवलयिनो भुवो विभागाः ॥ २१ ॥

लक्ष्मणः । अयमार्ये हनुमान् ।

सीता । एसो सो चिरणिव्विण्णजीअलोअसमुद्धरण-गुरुओवआरी महाभाओ मारुदी (एष स चिरनिर्विण्णजीवलोकसमुद्धरणगुरूपकारी महाभागो मारुतिः) ।

रामः । दिष्ट्या सोऽयं महाबाहुरञ्जनानन्दवर्द्धनः ।
यस्य वीर्येण कृतिनो वयं च भुवननानि च ॥ २२ ॥

सीता । वच्छ एसो कुसुमिदकअम्बतरुतण्डाविदवरहिणो किण्णामहेओ गिरी । जत्थ अणुभावसोहग्गमेत्तपरिसेसधूसरसिरी मुहुत्तं मुच्छन्तो तुए परुदिएण अवलम्बिदो तरुअले अज्जउत्तो आलिहिदो (वत्स एष कुसुमितकदम्बतरुताण्डीक्तबर्हिणः किन्नामधेयो गिरिः । यत्रानुभावसौभाग्यमात्रपरिशेषधूसरश्रीर्मुहूर्त्तं मूर्च्छंस्त्वया प्ररुदितेनावलम्बितस्तरुतल आर्यपुत्र आलिखितः) ।

लक्ष्मणः । सोऽयं शैलः ककुभसुरभिर्माल्यवान् नाम यस्मिन्
नीलः स्निग्धः श्रयति शिखरं नूतनस्तोयवाहः ।

रामः । वत्सैतस्माद्विरम विरमातःपरं न क्षमोऽस्मि
प्रत्यावृत्तः पुनरपि समे जानकीविप्रयोगः ॥ २३ ॥

---

१. पच्चुद्धरण (प्रत्युद्धरण) ।
२ महानुभाओ (महानुभावः)
३ पुनरिव ।

Digitized by Google

लक्ष्मणः। अतःपरमार्यस्य तत्रभवतो[1], कपिराक्षसानां चासंख्यातान्युत्तरोत्तराणि कर्माश्चर्याणि। परिश्रान्ता चेत्तमार्या तद्विज्ञापयामि विश्राम्यताम्।

सीता। अज्जउत्त एदिणा चित्तदंसणेण पच्चुप्पण्णदोहदाए अत्थि मे विण्णप्पम् (आर्यपुत्र एतेन चित्रदर्शनेन प्रत्युत्पन्नदोहदाया अस्ति मे विज्ञाप्यम्)।

रामः। नन्वाज्ञाप्य।

सीता। जाणे पुणो वि पसण्णगम्भीरासु वणराइसु विहरीस्सं पवित्तसोम्मसिसिरावगाहं अभअवदिं भाईरहिं अवगाहिस्सम् (जाने पुनरपि प्रसन्नगम्भीरासु वनराजिषु विहरिष्यामि पवित्रसौम्यशिशिरावगाहां च भगवतीं भागीरथीमवगाहिष्य इति)।

रामः। वत्स लक्ष्मण।

लक्ष्मणः। एषोऽस्मि।

रामः। अचिरं सम्पादनीयोस्या दोहद इति सम्मत्येवगुरुभिः सन्दिष्टम्। तदस्खलितमुखसम्पातं रथमुपस्थापय।

सीता। अज्जउत्त तुम्हेहिं वि ताहिं गंतव्वं (आर्यपुत्र युष्माभिरपि तत्र गन्तव्यम्)।

रामः। अयि कठिनहृदये एतदपि वक्तव्यमेव।

सीता। तेण हि पिअं मे (तेन हि प्रियं मे)।

लक्ष्मणः। यथाज्ञापयत्यार्यः। (इति निष्क्रान्तः)

रामः। प्रिये इतो वातायनोपकण्ठे मुहूर्तं संविष्टौ भवावः।

---

1 वातायनावर्तके.।

Digitized by Google

सीता । एवं होदु । ओहीरिज्जामि क्खु परिस्समजणी-दाए निद्दाए (एवं भवतु अपहिये खलु परिश्रमजनितया निद्रया) ।

रामः । तेन हि निरन्तरमवलम्बस्व मामत्र शयनाय ।

जीवयन्निव ससाध्वसश्रम-
स्वेदविन्दुरधिकण्ठमर्प्यताम् ।
बाहुरन्दवमधूखचुम्बित-
स्यन्दिचन्द्रमणिहारविभ्रमः ॥ २४ ॥

(तथाकारयन् सानन्दम्) प्रिये किमेतत्

विनिश्चेतुं शक्यो न सुखमिति वा दुःखमिति वा
विषादो निद्रा वा किमु विषविसर्पः किमु मदः ।
तव स्पर्शे स्पर्शे मम हि परिमूढेन्द्रियगणो
विकारश्चैतन्यं भ्रमयति च सम्मीलयति च ॥२५॥

सीता । (विहस्य) थिरप्पसादा तुह्मे इदो दाणीं किं अवरं (स्थिरप्रसादा यूयमित इदानीं किमपरम्) ।

रामः । म्लानस्य जीवकुसुमस्य विकाशनानि

सन्तर्पणानि सकलेन्द्रियमोहनानि ।
एताानि ते सुवचनानि सरोरुहाक्षि
कर्णामृतानि मनसश्च रसायनानि ॥ २६ ॥

सीता । पिअंवेद सइस्सम् (प्रियंवद शयिष्ये) । (इति शयनाय समन्ततो निरूपयति) ।

रामः । अयि किमन्वेष्टव्यम्

---

१ शक्ये ।
२ प्रमोहो ।
३ भ्रमयति समुन्मीलयतिच ।
४ एतानि तानि वचनानि सरोरुहाक्ष्याः ।
५ पिअंवद एहि सांविसम्ह (प्रियंवद एहि संविशामः) ।

Digitized by Google

आ विवाहसमयाद्गृहे वने
शैशवे तदनु यौवने पुनः ।
स्वापहेतुरनुपाश्रितोऽन्यया
रामबाहुरुपधानमेष ते ॥ २७ ॥

सीता । (विघ्नं नाटयन्ती) अत्थि एदं अज्जउत्त अत्थि एदं (अस्त्येतदार्यपुत्र अस्त्येतत्)। (स्वपिति)

रामः । कथं प्रियवचना वक्षसि सुप्तेव । (निर्वर्ण्य सस्नेहम्)

इयं गेहे लक्ष्मीरियममृतवर्तिर्नयनयो-
रसावस्याः स्पर्शो वपुषि बहलश्चन्दनरसः ।
अयं कण्ठे बाहुः शिशिरमसृणो मौक्तिकसरः
किमस्या न प्रेयो यदि परमसह्यस्तु विरहः ॥ २८ ॥

प्रविश्य

प्रतीहारी । देअ उवट्ठिदो (देव उपस्थितः)।

रामः । अयि कः ।

प्रतीहारी । आसण्णपरिचारओ दुम्मुहो देअस्स (आसन्नपरिचारको दुर्मुखो देवस्य)।

रामः (स्वगतम्) शुद्धान्तचारी दुर्मुखः स मया पौरजानपदानपसर्पितुं प्रयुक्तः । (प्रकाशम्) आगच्छतु ।

(प्रतिहारी निष्क्रान्ता)

प्रविश्य

दुर्मुखः । (स्वगतम्) हा कहं सीदादेइए ईरिसं अचिन्तणिज्जं जणाववादं देअस्स कहइस्स । अहवा णिओओ क्खु मे ईरिसो मन्दभाअस्स । (हा कथं सीतादेव्या ईदृशम-

---

१ किमस्या न प्रेयः किमपरमसह्यस्तु विरहः ।

किमस्या न प्रेयो यदि पुनरसह्यो न विरहः ।

Digitized by Google

चिन्तनीयं जनापवादं देवस्य कथयिष्यामि । अथवा नियोगः खल्वीदृशो मे मन्दभागस्य) ।

सीता । (उत्त्रस्यति) हा अज्जउत्त सोम्म कहिं सि (हा आर्यपुत्र सौम्य कुत्रासि) ।

रामः । अये सैवेयं रणरणकदायनी चित्रदर्शनाद्विरहभावना देव्याः स्वप्नोद्वेगं करोति । (सस्नेहमङ्कगमस्याः परामृशन्)

अद्वैतं सुखदुःखयोरनुगुणं सर्वास्ववस्थासु य-
द्विश्रामो हृदयस्य यत्र जरसा यस्मिन्नहार्यो रसः ।
कालेनावरणात्ययात् परिणते यत् स्नेहसारे स्थितं
भद्रं प्रेम सुमानुषस्य कथमप्येकं हि तत् प्राप्यते ॥३९॥

दुर्मुखः । (उपसृत्य) जआदि देओ (जयति देवः) ।

रामः । ब्रूहि यदुपलब्धम् ।

दुर्मुखः । उवत्थुवन्ति देअं पौरजाणवदा विसुमरिदा अम्हे महाराअदसरहस्स रामभद्देण त्ति (उपस्तुवन्ति देवं पौरजानपदा विस्मारिता वयं महाराजदशरथस्य रामभद्रेणेति) ।

रामः । अर्थवाद एषः । दोषं तु कञ्चित् कथय येन स प्रतिविधीयते ।

दुर्मुखः । (सास्रम्) सुणादु देओ । (कर्णं) एदं एवं (शृणोतु देवः । एवमेवम्) ।

रामः । अहह तीव्रसंवेगो वाग्वज्रः ।

(मूर्च्छति)

दुर्मुखः । आस्ससदु देओ (आश्वसितु देवः) ।

रामः । (आश्वस्य)

---

१ सस्नेहं परामृशन् । | १ प्रार्थ्यते ।

Digitized by Google

हा हा धिक् परगृहवासदूषणं य-
द्दैवेज्ञाः प्रशमितमद्भुतैरुपायैः।
एतत्तत् पुनरपि दैवदुर्विपाका-
दालर्के विषमिव सर्वतः प्रसृप्तम् ॥ ४० ॥

तत् किमत्र मन्दभाग्यः करोमि। (विमृश्य सकरुणम्) अथवा किमन्यत्

सतां केनापि कार्येण लोकस्याराधनं व्रतम्।
यत् पूजितं हि तातेन माञ्च प्राणांश्च मुञ्चता ॥४१॥

संप्रत्येव भगवता वसिष्ठेन सन्दिष्टम्।

अपिच

यत् सावित्रैर्दीपितं भूमिपालै-
र्लोकश्रेष्ठैः साधु शुद्धं चरित्रम्।
मत्सम्बन्धात् कश्मला किंवदन्ती
स्याच्चेदस्मिन् हन्त धिङ् मामधन्यम् ॥४२॥

हा देवि देवयजनसम्भवे हा स्वजन्मानुग्रहपवित्रितवसुन्धरे मिथिजनकवंशनन्दिनि हा पावकवसिष्ठारुन्धतीप्रशस्तशीलशालिनि हा रामैकजीविते हा महारण्यवासप्रियसखि हा प्रियस्तोकवादिनी कथमेवंविधायास्तवायमीदृशः परिणामः।

त्वयाजगन्ति पुण्यानि त्वय्यपुण्या जनोक्तयः।
नाथवन्तस्त्वया लोकास्त्वमनाथा विपत्स्यसे ॥४३॥

दुर्मुख ब्रूहि लक्ष्मणमेष ते नूतनो राजा रामः समाज्ञापयति। (कर्णे) एवमेवम्।

---

१ पूरितं।
२ जनकवंशनन्दिनि।
३ प्रशस्तशीले।
४ रामैकजीविते।
५ हा तातप्रिये।

Digitized by Google

दुर्मुखः । कहं दाणीं अग्गिपरिसुद्धाए गब्भपरिप्फुडिद-पवित्तरहुउल सन्ताणाए देइए[1] दुज्जणवअणादो एवं अणज्जं अज्झवसिदं देएण[2] (कथमिदानीमग्निपरिशुद्धाया गर्भस्फुरितपवित्ररघुकुलसन्तानाया देव्या दुर्जनवचनादेवमनार्यमध्यवसितं देवेन) ।

रामः । शान्तं कथं दुर्जनाः पौरजानपदाः ।

इक्ष्वाकुवंशोऽभिमतः प्रजानां
जातं च दैवाद्वचनीयबीजम्[3] ।
यच्चाद्भुतं कर्म विशुद्धिकाले
प्रत्येतु कस्तद्दुरिति दूरवृत्तम्[4] ॥ ४४ ॥

तद्गच्छ ।

दुर्मुखः । हा देइ (हा देवि) । (निष्क्रान्तः)

रामः । हा कष्टमतिबीभत्सकर्मा नृशंसोऽस्मि संवृत्तः

शैशवात् प्रभृति पोषितां प्रियां[5]
स्नेहादपृथगाशयामिमाम्[6] ।
छद्मना परिददामि मृत्यवे
सौनिको गृहशकुन्तिकामिव ॥ ४५ ॥

तत् किमस्पर्शनीयः पातकी देवीं दूषयामि । (सीतायाः शिरः स्वैरमुन्नमय्य बाहुमाकर्षन्)

अपूर्वकर्मचाण्डालमयि मुग्धे विमुञ्च माम् ।
श्रितासि चन्दनभ्रान्त्या दुर्विपाकं विषद्रुमम् ॥ ४६ ॥

---

१ गब्भट्ठिदपवित्तरहुउल (गर्भस्थितपवित्ररघुकुल) ।
२ दुज्जणवअणादो एवं अज्झवसिदं देएण (दुर्जनवचनादेवमध्यवसितं देवेन) ।
३ वचनीयमेतत् ।
४ प्रत्येतुकस्तद्भुविदूरवृत्तम ।
५ प्रियै ।
६ अपृथगाश्रयामिमाम् ।

Digitized by Google

(उत्थाय) हन्त विपर्यस्तः संप्रति जीवलोकः पर्यवसितं जीवितप्रयोजनं रामस्य । शून्यमधुना जीर्णारण्यं जगत् । असारः संसारः । कष्टप्रायं शरीरम् । अशरणोऽस्मि किं करोमि कागतिः । अथवा

दुःखसंवेदनायैव रामे चैतन्यमाहितम् ।
मर्मोपघातिभिः प्राणैर्वज्रकीलायितं स्थिरैः ॥ ४७ ॥

हा अम्ब अरुन्धति हा भगवन्तौ वशिष्ठविश्वामित्रौ हा भगवन् पावक हा देवि भूतधात्रि हा तात जनक हा तात हा मातरः हा परमोपकारिन् लङ्काधिपते बिभीषण हा प्रियसख सुग्रीव हा सौम्य हनूमन् हा सखि त्रिजटे मुषिताः स्थ परिभूताः स्थ रामदूतकेन । अथवा कश्च तेषामहमिदानीमाह्वाने ।

ते हि मन्ये महात्मानः कृतघ्नेन दुरात्मना ।
मया गृहीतनामानः स्पृश्यन्त इव पाप्मना ॥ ४८ ॥

योऽहम्

विस्रम्भादुरसि निपत्य लब्धनिद्रा-
मुन्मुच्य प्रियगृहिणीं गृहस्य शोभाम् ।
आतङ्कस्फुरितकठोरगर्भगुर्वीं
कव्याद्भ्यो बलिमिव निर्घृणः क्षिपामि ॥ ४९ ॥

(सीतायाः पादौ शिरसि कृत्वा) देवि देवि अयं पश्चिमस्ते रामस्य शिरसा पादपङ्कजस्पर्शः । (रोदिति)

(नेपथ्ये)

अब्रह्मण्यमब्रह्मण्यम् ।

रामः । ज्ञायतां भोः किमेतत् ।

---

१ चैतन्यमर्पितम् ।
२ हृदि ।
३ दूषिताः स्थ ।
४ कोनामाहं तेषामाह्वाने ।

(पुनर्नेपथ्ये)

ऋषीणामुग्रतपसां यमुनातीरवासिनाम् ।
लवणत्रासितः स्तोमः शरण्यं त्वामुपस्थितः ॥५०॥

रामः । आः कथमद्यापि राक्षसत्रासः । तद्यावदस्य दुरात्मनः कुम्भीनसीपुत्रस्योन्मूलनाय शत्रुघ्नं प्रेषयामि । (कतिचित्पदानि गत्वा पुनः प्रतिनिवृत्य) हा देवि कथमेवंगता भविष्यसि भगवति वसुन्धरे श्लाघ्यां दुहितरमवेक्षस्व जानकीम् ।

जनकानां रघूणां च यत्कृत्स्नं गोत्रमङ्गलम् ।
तौ देवयजने पुण्ये पुण्यशीलामजीजनः ॥ ५१ ॥

(निष्क्रान्तः)

सीता । हा सोम्म अज्जउत्त कहिं सि । (सहसोत्थाय) हद्धी हद्धी दुस्सिविणएण[3] विप्पलद्धा अहं अज्जउत्तं आक्रन्दामि । (विलोक्य) । हद्धी हद्धी एआइणिं मं पमुत्तं उज्झिअ गदो अज्जउत्तो । किं दाणीं एदं । भोदु से कुविस्सं जइ तं पेक्खन्ती अत्तणो पहविस्सं । को एत्थ परिअणो । (हा सौम्य आर्यपुत्र कुत्रासि । हा धिक् हा धिक् दुःस्वप्नेन विप्रलब्धाऽहमार्यपुत्रमाक्रन्दामि । हा धिक् हा धिक् एकाकिनीं मां प्रसुप्तामुज्झित्वा गत आर्यपुत्रः । किमिदानीमेतत् । भवतु तस्मै कोपिष्यामि यदि तं प्रेक्षमाणा आत्मनः प्रभविष्यामि । कोऽत्र परिजनः) ।

---

१ त्रातारं ।
२ त्वं ।
३ हद्धि हद्धि दुस्सिविणरणरणअ विप्पलद्धा अज्जउत्तसुण्णं विअ अत्तांणं पेक्खामि (हा धिक् हा धिक् दुस्वप्नरणरणकविप्रलब्धार्यपुत्रशून्यामिवात्मानं प्रेक्षे) ।

Digitized by Google

(प्रविश्य)

दुर्मुखः। देइ कुमारलक्खणो विण्णवेदि सज्जो रहो आरुहदु देइत्ति (देवि कुमारलक्ष्मणो विज्ञापयति सज्जो-रथ आरोहतु देवीति)।

सीता। इअं आरुहामि। (उत्थाय) परिप्फुरइ विअ मे गब्भभारो ता सिढिलं गच्छह्म (इयमारोहामि। परिस्फुरतीव मे गर्भभारस्तच्छिथिलं गच्छावः)।

दुर्मुखः। इदो इदो देइ (इत इत देवि)।

सीता। णमो तपोधणाणं णमो रहुउलदेअदाणं णमो अज्जउत्तचरणकमलाणं णमो सअलगुरुअणाणं। नमस्त-पोधनेभ्यो नमो रघुकुलदेवताभ्यो नम आर्यपुत्रचरणकमलेभ्यो नमः सकलगुरुजनेभ्यः)। (निष्क्रान्तौ)

चित्रदर्शनो नाम

प्रथमोऽङ्कः।

---

१ सणिअं (शनैः)।

२ This speech is omitted in some of the editions.

Digitized by Google

(नेपथ्ये)

स्वागतं तपोधनायै ।

(प्रविश्य)

अध्वगवेशा तापसी । अये वनदेवतेयं फलकुसुमपल्लवार्घ्येण मामुपतिष्ठते ।

(प्रविश्य)

वनदेवता । (अर्घ्यं विकीर्य्य)

यथेच्छं भोग्यं[1] वो वनमिदमर्घं मे सुदिवसः
सतां सद्भिः सङ्गः कथमपि हि पुण्येन भवति ।
तरुच्छाया तोयं यदपि तपस्वी योग्यमशनं
फलं वा मूलं वा तदपि न पराधीनमिह वः ॥१॥

तापसी । किमत्रोच्यते

प्रियप्राया वृत्तिर्विनयमधुरो वाचि नियमः
प्रकृत्या कल्याणी मतिरनवगीतः परिचयः ।
पुरो वा पश्चाद्वा तदिदमविपर्यासितरसं
रहस्यं साधूनामनुपधि विशुद्धं विजयते ॥ २ ॥

(उपविशतः)

वनदेवता । कां पुनरत्रभवतीमवगच्छामि ।

तापसी । आत्रेय्यस्मि ।

वनदेवता । आर्ये आत्रेयि कुतः पुनरिहागम्यते किंप्रयोजनं वा दण्डकारण्यप्रवेशस्य[3] ।

---

१ यथेच्छं भोज्यम् । यथेच्छाभोज्यम् ।

२ मसृणो

३ किंप्रयोजनो वा दण्डकारण्य प्रचारः ।

Digitized by Google

आत्रेयी। अस्मिन्नगस्त्यप्रमुखाः प्रदेशे
भूयांस उद्गीथविदो वसन्ति।
तेभ्योऽधिगन्तुं निगमान्तविद्यां
वाल्मीकिपार्श्वादिह पर्यटामि ॥ ३ ॥

वनदेवता। यदा तावदन्येऽपि मुनयस्तमेव हि पुराणब्रह्मवादिनं प्राचेतसमृषिं ब्रह्मपारायणायोपासते तत् कोऽयमार्याया दीर्घप्रवासप्रयासः।

आत्रेयी। तत्र प्रहानध्ययनप्रत्यूह इति दीर्घप्रवासोऽङ्गीकृतः।

वनदेवता। कीदृशः।

आत्रेयी। तस्य भगवतः केनापि देवताविशेषेण सर्वप्रकारादद्भुतं स्तन्यत्यागमात्रके वयसि वर्त्तमानं दारकद्वयमुपनीतम्। तत्[1] खलु न केवलमृषीणामपि तु चराचराणां[2] भूतानामान्तराणि तत्त्वान्युपस्नेहयति।

वनदेवता। अपि तयोर्नामसंविज्ञानमस्ति।

आत्रेयी। तयैव किल देवतया तयोः कुशलवाविति नामनी प्रभावश्चाख्यातः।

वनदेवता। कीदृशः प्रभावः।

आत्रेयी। तयोः किल सरहस्यजृम्भकास्त्राण्याजन्मसिद्धानीति[3]।

वनदेवता। अहो नु भोश्चित्रमेतत्[4]।

आत्रेयी। तौच भगवता वाल्मीकिना धात्रीकर्म वस्तुतः[5] परिगृह्य पोषितौ परिरक्षितौ च वृत्तचूडौ[6] च त्रयीवर्जमितरा

१ तत्केवलमृषीणामेव न किन्तु तिरश्चां भूतानामप्यन्तराण्युपस्नेहयति।
२ सचराचराणाम्।
३ जन्मसिद्धानीति।
४ इति हि भोश्चित्रमेतत्।
५ धात्रीकर्मवत्सलतां।
६ वृत्तचौडकर्मणोश्च तयोस्त्रयीवर्जमितरास्तिस्रो विद्याःसावधानेन परिनिष्ठापिताः।

Digitized by Google

विद्याः सावधानेन परिपाठितौ। समनन्तरञ्च गर्भैकादशे वर्षे क्षात्रेण कल्पेनोपनीय गुरुणा त्रयीविद्यामध्यापितौ नस्तेताभ्यामतिप्रदीप्तप्रज्ञाभेधाभ्यामस्मदादेः सहाध्ययनयोगोऽस्ति। यतः

वितरति गुरुः प्राज्ञे विद्यां यथैव तथा जडे
न[2] च खलु तयोर्ज्ञाने शक्तिं करोत्यपहन्ति वा।
भवति च तयोर्भूयान्[3] भेदः फलं प्रति तद्यथा
प्रभवति शुचिर्बिम्बोद्ग्राहे मणिर्न मृदां चयः ॥४॥

वनदेवता। अयमसावध्ययनप्रत्यूहः।

आत्रेयी। अपरश्च।

वनदेवता। अथापरः कः।

आत्रेयी। अथ स ब्रह्मर्षिरेकदा मध्यन्दिनसमये नदीं तमसामनुप्रपन्नः। तत्र च युग्मचारिणोः क्रौञ्चयोरेकं व्याधेन विध्यमानमपश्यत्। आकस्मिकप्रस्रवभासां च देवीं वाचम्[4] व्यतिकीर्णामनुष्टुप्छन्दसा परिच्छिन्नामभ्युदैरयत्।

मा निषाद प्रतिष्ठां त्वमगमः शाश्वतीः समाः।
यत् क्रौञ्चमिथुनादेकमवधीः काममोहितम् ॥ ५ ॥[5]

वनदेवता। चित्रमाम्नायादन्यो नूतनश्छन्दसामवतारः।

आत्रेयी। तेन खलु पुनः समयेन तं भगवन्तमाविर्भूतशब्दब्रह्मप्रकाशमृषिमुपगम्य भगवान् भूतभावनः पद्मयोनिरवोचत्। ऋषे प्रबुद्धोऽसि वागात्मनि ब्रह्मणि तद् ब्रूहि रामचरितम्। अव्याहतज्योतिरार्षं ते प्रातिभं चक्षुः आद्यः

---

१ अतिप्रदीप्तप्रज्ञाभ्याम्।
२ नतु।
३ पुनर्।
४ वाचमानुष्टुभेन छन्दसा परिणतामभ्युदैरयत्। वाचमव्यतिकीर्णवर्णामनुष्टुप्छन्दसा परिच्छिन्नामभ्युदैरयत्।
५ This speech is omitted in some of the editions.
६ ते प्रतिभा चक्षुः

Digitized by Google

कविरसीत्युक्त्वा तत्रैवान्तर्हितः। अथ भगवान् प्राचेतसः प्रथमं मनुष्येषु शब्दब्रह्मणस्तादृशं विवर्तमितिहासं रामायणं प्रणिनाय।

वनदेवता। हन्त तर्हि मण्डितः संसारः।

आत्रेयी। तस्मादवोचं महानध्ययनमत्यूह इति।

वनदेवता। युज्यते।

आत्रेयी। विश्रान्तास्मि भद्रे। संप्रसृगस्त्याश्रमस्य पन्थानं ब्रूहि।

वनदेवता। इतः पञ्चवटीमनुप्रविश्य गम्यतामनेन गोदावरीतीरेण।

आत्रेयी। (सबाष्पम्) अप्येतत्तपोवनम्। अप्येषा पञ्चवटी। अपि सरिदियं गोदावरी। अप्ययं गिरिः प्रस्रवणः। अपि जनस्थानदेवता वासन्ती त्वम्।

वासन्ती। अस्येतत् सर्वम्।

आत्रेयी। वत्से जानकि

स एष ते वल्लभबन्धुवर्गः
प्रासङ्गिकीनां विषयः कथानाम्।
त्वां नामशेषामपि दृश्यमानः
प्रत्यक्षदृश्यामिव नः करोति॥ ६॥

वासन्ती। (सभयं स्वगतम्) कथं नामशेषामित्याह। (प्रकाशम्) आर्ये किमित्याहितं सीतादेव्याः।

आत्रेयी। न केवलमित्याहितं सापवादमपि। (कर्णे) एवमेवम्।

---

१ तर्हि पण्डितः संसारः।
२ (साक्षम्)
३ अपि वनदेवता जनस्थानवासिनी वासन्ती त्वम्।
४ एव।
५ वर्तमानां।
६ न केवलमित्याहितं सापवादमपि। वासन्ती। कथमिव। आत्रेयी (कर्णे) एवमेवम्।

Digitized by Google

वासन्ती । अहह दारुणो दैवनिर्घातः ।

(मूर्च्छति)

आत्रेयी । भद्रे समाश्वसिहि समाश्वसिहि ।

वासन्ती । हा प्रियसखि हा महाभागे ईदृशस्ते निर्माणभागः । रामभद्र रामभद्र । अथवाऽलं त्वया । आर्ये आत्रेयि अथ तस्मादरण्यात् परित्यज्य निवृत्ते लक्ष्मणे सीतादेव्याः किं वृत्तमिति काचिदस्ति प्रवृत्तिः ।

आत्रेयी । नहि नहि ।

वासन्ती । हा कष्टम् । अरुन्धतीवसिष्ठाधिष्ठितेषु[1] रघुकदम्बकेषु जीवन्तीषु प्रवृद्धासु राज्ञीषु कथमिदं जातम् ।

आत्रेयी । ऋष्यशृंगाश्रमे गुरुजनस्तदासीत् । सम्प्रतिं तु परिसमाप्तं तद् द्वादशवार्षिकं सत्रम्[2] । ऋष्यशृङ्गेण विसर्जिताश्च सम्पूज्य गुरवः। ततो भगवत्यरुन्धती नाहं बधूविरहितामयोध्यां गमिष्यामीत्याह । तदेव राममातृभिरनुमोदितम् । तदनुरोधाद्भगवतो वसिष्ठस्य परिशुद्धा वाचो यथा वाल्मीकितपोवनं गत्वा तत्र वत्स्याम इति ॥ ५ ॥

वासन्ती । अथ स राजा किमाचारः[3] सम्प्रति वर्तते ।

आत्रेयी । तेन राज्ञा क्रतुरश्वमेधः प्रक्रान्तः ।

वासन्ती । हा[4] धिक् परिणीतमपि ।

आत्रेयी । शान्तं शान्तम्[5] ।

वासन्ती । का तर्हि यज्ञे सहधर्मचारिणी ।

आत्रेयी । हिरण्मयी सीताप्रतिकृतिः ।

---

१ आर्यारुन्धतीवसिष्ठाधिष्ठिते रघुकुल गृहे ।.
२ ऋष्यशृङ्गसत्रे ।
३ किमाचारः ।
४ अहह धिक् ।
५ शान्तं पापम् ।

Digitized by Google

वासन्ती। हन्त भोः

वज्रादपि कठोराणि मृदूनि कुसुमादपि।
लोकोत्तराणां चेतांसि को नु विज्ञातुमर्हति ॥ ७ ॥

आत्रेयी। विसृष्टश्च वामदेवाभिपन्नितो मेध्योऽश्वः। उपकल्पिताश्च यथाशास्त्रं तस्य रक्षितारः। तेषामधिष्ठाता च लक्ष्मणात्मजश्चन्द्रकेतुरवाप्तदिव्यास्त्रसंप्रदायश्चतुरङ्गबलान्वितोऽनुप्रहितः।

वासन्ती। (सस्नेहकौतुकास्त्रम्) कुमारलक्ष्मणस्यापि पुत्रः। हन्त मातर्जीवामि।

आत्रेयी। अत्रान्तरे ब्राह्मणेन मृतं पुत्रमारोप्य राजद्वारि सोरस्ताडमब्राह्मण्यमुद्घोषितम्। ततो न राजापराधमन्तरेण प्रजास्वकालमृत्युश्चरतीत्यात्मदोषं निरूपयति करुणामये रामभद्रे सहसैवाशरीरिणी वागुदचरत्

शम्बूको नाम वृषलः पृथिव्यां तप्यते तपः।
शीर्षच्छेद्यः स ते राम तं हत्वा जीवय द्विजम् ॥८॥

इत्युपश्रुत्य कृपाणपाणिः पुष्पकं विमानमारुह्य सर्वा दिशो विदिशश्च शूद्रतापसान्वेषणाय जगत्पतिः संचरितुमारब्धवान्।

वासन्ती। शम्बूको नाम धूमपः शूद्रोऽस्मिन्नेव जनस्थाने तपश्चरति। तदपिनाम रामभद्रः पुनरिदं वनमलंकुर्यात्।

आत्रेयी। भद्रे गम्यतेऽधुना।

---

१ को हि।
२ दत्तदिव्यास्त्रसंप्रदायः
३ मृतं पुत्रमुत्क्षिप्य राजद्वारे सोरस्ताडनम्।
४ राजापचारमन्तरेण।
५ इत्युपश्रुत्यैवाकृष्टकृपाणपाणिः। इत्युपश्रुत्यैव कृपाणपाणिः।
६ पुनरपीदम्।

Digitized by Google

वासन्ती । एवमस्तु[1] कठोरी भूतस्तु दिवसः । तथाहि

कण्डूलद्विपगण्डपिण्डकषणोत्कम्पेन संपातिभि-
र्धर्मस्रंसितबन्धनैः स्वकुसुमैरर्चन्ति गोदावरीम् ।
छायापस्किरमाणविष्किरमुखव्याकृष्टकीटत्वचः
कूजत्कान्तकपोतकुक्कुटकुलाः कूले कुलायद्रुमाः ।९।

(परिक्रम्य निष्क्रान्ते)

विष्कम्भकः ।

(ततः प्रविशति पुष्पकस्थः सदयोद्यतखड्गो रामः)

रामः । रे हस्त दक्षिणमृतस्य शिशोर्द्विजस्य-
जीवातवे विसृज शूद्रमुनौ कृपाणम् ।
रामस्य गात्रमसि दुर्वहगर्भखिन्न-
सीताविवासनपटोः[2] करुणा कुतस्ते ॥१०॥

(कथंचित् प्रहृत्य) कृतं रामसदृशं कर्म । अपि जीवेत् स ब्राह्मणशिशुः !

(प्रविश्य)

दिव्यपुरुषः । जयतु जयतु देवः ।

दत्ताभये त्वयि यमादपि दण्डधारे
सञ्जीवितः शिशुरयं मम चेयमृद्धिः ।
शम्बूक एष शिरसा चरणौ नतस्ते
सत्सङ्गजानि निधनान्यपि तारयन्ति ॥ ११ ॥

रामः। द्वयमपि प्रियं नः। तदनुभूयतामुग्रस्य तपसः फलम्[3]

---

१ आर्ये आत्रेयी एवमस्तु कठोरी भूतोऽयं दिवसः।
२ कान्त।
३ प्रवासनपटोः।
४ परिपाकः।

Digitized by Google

यत्रानन्दाश्च मोदाश्च यत्र पुण्याश्च संपदः[1]।
वैराजा नाम ते लोकास्तैजसाः सन्तु ते ध्रुवोः॥१२॥

शम्बूकः। युष्मत्पादप्रसादोपाय एष महिमा किमत्र तपसः[3]। अथवा महदुपकृतं तपसा

अन्वेष्टव्यो यदसि भुवने भूतनाथः शरण्यो
मामन्विष्यन्निह वृषलकं योजनानां शतानि।
क्रान्त्वा प्राप्तः स इह तपसः[4] संप्रसादोऽन्यथा चेत्
कायोध्यायाः पुनरुपगमो दण्डकायां वने वः॥१३॥

रामः। किं नाम दण्डकेयम् (सर्वतोऽवलोक्य) आं

स्निग्धश्यामाः क्वचिदपरतो भीषणाभोगरूक्षाः
स्थाने स्थाने मुखरककुभो झाङ्कृतैर्निर्झराणाम्।
एते तीर्थाश्रमीगिरिसरिद्[5]भर्भकान्तारमिश्राः
संदृश्यन्ते परिचितभुवो[6] दण्डकारण्यभागाः॥१४॥

शम्बूकः। दण्डकैवेयमत्र किल पूर्वं निवसता देवेन

चतुर्दशसहस्राणि रक्षसां भीमकर्मणाम्।
त्रयश्च दूषणखरत्रिमूर्द्धानो रणे[7] हताः॥१५॥

येन सिद्धक्षेत्रेऽस्मिञ्जनस्थाने[8] मादृशामपि भीरुजनानामकुतोभयः सञ्चारो जातः।

रामः। न केवलं दण्डकेयं जनस्थानमपि।

शम्बूकः। बाढम्। एतानि खलु सर्वभूतलोमहर्षणान्युन्मत्तचण्डश्वापदकुलसंकुलगिरिगह्वराणि[9] जनस्थानपर्यन्तानि दीर्घारण्यानि दक्षिणां दिशमभिवर्त्तन्ते।

---

१ यत्र पुण्याभिसंभवाः।
२ शिवाः।
३ नतु तपसः फलम्।
४ तपसाम्।
५ सरिद्गर्त।
६ परिचितमुखाः।
७ निपातिताः।
८ क्षेत्रे।
९ भीरुजानपदानां।

Digitized by Google

तथाहि

निष्कूजस्तिमिताः क्वचित् क्वचिदपि प्रोच्चण्डसत्त्वस्वनाः
स्वेच्छासुप्तगभीरघोरभुजगश्वासप्रदीप्ताग्नयः ।
सीमानः प्रदरोदरेषु विलसत्स्वल्पाम्भसो यास्वयं
तृष्यद्भिः प्रतिसूर्यकैरजगरस्वेदद्रवः पीयते ॥ १६ ॥

रामः । पश्यामि च जनस्थानं भूतपूर्वखरालयम् ।
प्रत्यक्षैनिव वृत्तान्तान् पूर्वाननुभवामि च ॥१७॥
(सर्वतोऽवलोक्य)

प्रियरामा हि सर्वथा वैदेह्यासीत् । एतानि तानि नाम कान्ताराणि । किमतःपरं भयानैकंस्यात् । (सास्रम्)

त्वया सह निवत्स्यामि वनेषु मधुगन्धिषु ।
इँतीहारमतैवासौ स्नेहस्तस्याः स तादृशः ॥ १८ ॥

अकिञ्चिदपि कुर्वाणः सौख्यैर्दुःखान्यपोहति ।
तत्तस्य किमपि द्रव्यं योहि यस्य प्रियोजनः ॥१९ ॥

शम्बूकः । तदलमेभिर्दुरासदैः । अथैतानि मदकलमयूरकण्ठकोमलच्छविभिरवकीर्णानि पर्यन्तैरविरलनिविष्टनीलबहलच्छायतरुणतरुषण्डमण्डितान्यसंभ्रान्तविविधमृगयूथानि पश्यतु महानुभावः प्रशान्तगभीराणि मध्यमारण्यकानि

इह समदशकुन्ताक्रान्तवानीरवीरुत्
प्रसवसुरभिशीतस्वच्छतोया वहन्ति ।

---

१ घोष । भोग ।
२ प्रत्यक्षमिव ।
३ भयानकस्य ।
४ इति हारमतैवासौ । इति वारमतीवासौ । इति चारमतीवासौ । इति वा रमते सीता । इति चारमते वासौ ।
५ पर्वतैः ।
६ मुक्त ।

Digitized by Google

फलभरपरिणामश्यामजम्बूनिकुञ्ज-
स्खलनमुखरभूरिस्रोतसो निर्झरिण्यः ॥ २० ॥

(अपिच)

दधति कुहरभाजामत्र भल्लूकयूना-
मनुरसितगुरूणिस्त्यानमम्बूकृतानि ।
शिशिरकटुकषायः स्त्यायते शल्लकीना-
मिभदलितविकीर्णग्रन्थिनिष्यन्दगन्धः ॥ २१ ॥

रामः । (सबाष्पस्तम्भम्) भद्र शिवास्ते पन्थानो देवयानं प्रतिपद्यस्व पुण्येभ्यो लोकेभ्यः ।

शम्बूकः । यावत् पुराणब्रह्मवादिनमगस्त्यमृषिमाभिवाद्य शाश्वतं पदमनुप्रविशामि ।

(इति निष्क्रांतः)

रामः । एतत्तदेव हि पुनर्[1]वनमद्य दृष्टं
यस्मिन्नभूम चिरमेव पुरा वसन्तः ।
आरण्यकाश्च गृहिणश्च रताः स्वधर्मे
सांसारिकेषु च सुखेषु वयं रसज्ञाः ॥ २२ ॥

(अपिच)

एते त एव गिरयो विरुवन्मयूरा-
स्तान्येव मत्तहरिणानि वनस्थलानि ।
आमञ्जुवञ्जुललतानि च तान्यमूनि
नीरन्ध्रनीलीनचुलानि सरित्तटानि ॥ २३ ॥

मेघमालेव यश्चायमारा[2]दपि विभाव्यते ।
गिरिः प्रस्रवणः सोऽयं यत्र गोदावरी नदी ॥२४॥

---

१ वनं पुनरद्य। | २ यः श्याम आरादपि।

Digitized by Google

अस्यैवासीन्महति शिखरे गृध्रराजस्य वास-
स्तस्याधस्ताद्वयमपि रतास्तेषु पर्णोटजेषु ।
गोदावर्याः पयसि विततश्यामलानोकहश्री-
रन्तः कूजन्मुखरशकुनो यत्र रम्यो वनान्तः ॥२५॥

तदत्रैव सा पञ्चवटी यत्र चिरनिवासेन विविधविस्र-म्भातिप्रसङ्गसाक्षिणः प्रदेशाः प्रियायाः प्रियसखी वास-न्ती च प्रतिवसति । तत् किमिदमापतितमद्य रामहत-कस्य । सम्प्रति हि

चिरोद्वेगारम्भी[2] प्रसृत इव तीव्रो विषरसः
कुताश्चित् संवेगाच्चलित[3] इव शल्यस्य शकलः ।
व्रणो रूढग्रन्थिः स्फुटित इव हृन्मर्मणि पुन-
र्घनीभूतः शोको विकलयति[4] मां नूतन[5] इव ॥२६॥

तथापि तान् पूर्वसुहृदो भूमिभागान् पश्यामि । (निरूप्य) अहो अनवस्थितो भूमिसन्निवेशः ।

पुरा यत्र स्रोतः पुलिनमधुना तत्र सरितां
विपर्यासं यातो घनविरलभावः क्षितिरुहाम् ।
बहोर्दृष्टं कालादपरमिव मन्ये वनमिदं
निवेशः शैलानां तदिदमिति बुद्धिं द्रढयति ॥ २७ ॥

हन्त परिहरन्तमपि मामितः पञ्चवटीस्नेहो बलादाकर्ष-तीव । (सकरुणम्)

यस्यां ते दिवसास्तया सह मया नीता यथा[6] स्वे गृहे
यत्सम्बन्धिकथाभिरेव सततं दीर्घाभिरास्थीयत[6] ।

---

१ विनत ।
२ चिराद्वेगारम्भी ।
३ निहित इव ।
४ विकलयति मां मूर्च्छयति च ।
५ नीताः पुनः ।
६ आस्थीयते ।

Digitized by Google

एकः संप्रति नाशितप्रियतमस्तामद्य रामः कथं
पापः पञ्चवटीं विलोकयतु वा गच्छत्वसंभाव्य वा
(प्रविश्य) ॥ २८ ॥

शम्बूकः। जयतु जयतु देवः। देव भगवानगस्त्यो मत्तः श्रुतभवत्सन्निधानस्त्वामाह परिकल्पितविमानावतरणमङ्गला प्रतीक्षते वत्सला लोपामुद्रा सर्वे च महर्षयस्तदेहि संभावयास्मान्। अथ प्रजविना पुष्पकेण स्वदेशमुपगम्याश्वमेधाय सज्जो भविष्यसीति।

रामः। यथाज्ञापयति भगवान्।

शम्बूकः। इतस्तर्हि देवः प्रवर्तयतु पुष्पकम्।

रामः। भगवति पञ्चवटि गुरुजनोपरोधात् क्षणं क्षम्यतामतिक्रमो रामस्य।

शम्बूकः। देव पश्य पश्य

कूजत् कुञ्जकुटीरकौशिकघटाघुत्कारवत्कीचक-
स्तम्बाडम्बरमूकमौकुलिकुलः क्रौञ्चावतोऽयं गिरिः।
एतस्मिन् प्रचलाकिनां प्रचलतामुद्वेजिताःकूजितै-
रुद्वेल्लन्ति पुराणचन्दनतरुस्कन्धेषु कुम्भीनसाः ॥२९॥

(अपिच)

एते ते कुहरेषु गद्गदनदद्गोदावरी-वारयो
मेघालम्बितमौलिनीलशिखराः क्षौणिभृतो दक्षिणाः।

---

१ चागस्त्यायनाः। अगस्त्यादयाः।
२ भवेति।
३ गुरुजनानुरोधात्।
४ गुञ्जत्।
५ पुराणरोहिणतरु-। रोहिततरु-।
६ मेघालंकृत।

Digitized by Google

अन्योन्यप्रतिघातसङ्कुलचलत्कल्लोलकोलाहलै-
रुत्तालास्त इमे गभीरपयसः पुण्याः सरित्सङ्गमाः ॥१०॥

(निष्क्रान्तौ)

पञ्चवटी प्रवेशो नाम
द्वितीयोऽङ्कः ।

(ततः प्रविशति नदीद्वयं तमसा मुरला च)

तमसा । सखि मुरले किमासि संभ्रान्तेव ।

मुरला । भगवति तमसे प्रेषितास्मि भगवतोऽगस्त्यस्य पत्न्या लोपामुद्रया सरिद्वरां गोदावरीमभिधातुं जानास्येव यथा वधूरागात् प्रभृति

अनिर्भिन्नगभीरत्वादन्तर्गूढघनव्यथैः[1] ।
पुटपाकप्रतीकाशो रामस्य करुणो रसः ॥१॥

तेनच तथाविधेष्टजनकष्टविनिपातजन्मना[2] प्रकर्षगतेन दीर्घशोकसन्तानेन संप्रति नितरां[3] परिक्षीणो रामभद्रस्तमवलोक्य कम्पितमिव मे हृदयम् । अधुना च प्रतिनिवर्त्तमानेन रामभद्रेण नियतमेव पञ्चवटीवने वधूसहवासविश्रम्भसाक्षिणः प्रदेशा द्रष्टव्याः । तेषु[4] च निसर्गधीरस्याप्येवं विधायामवस्थायामतिगम्भीराभोगशोकक्षोभसंवेगात् पदे पदे महान्ति प्रमादस्थानानि शङ्कनीयानि

---

१ अनिर्भिन्नागभिरत्वात् ।
२ गुरुव्यथः ।
३ कष्टपातजन्मना । कष्टपरिपाक ।
४ संतापेन ।
५ अतितराम् ।
६ वधूसहानवास ।
७ तेन च ।

Digitized by Google

रामभद्रस्य। तद्भगवति गोदावरि तत्र त्वया सावधानया भवितव्यम्।

वीचीवातैः शीकरक्षोदशीतै-
राकर्षद्भिः पद्मकिञ्जल्कगन्धान्।
मोहे मोहे रामभद्रस्य जीवं
स्वैरं स्वैरं प्रेषितैस्तर्पयेति ॥ २ ॥

तमसा। उचितमेव दाक्षिण्यं स्नेहस्य। संजीवनोपायस्तु मौलिक एव रामभद्रस्याद्य सन्निहितः।

मुरला। कथमिव।

तमसा। श्रूयताम् पुरा किल वाल्मीकितपोवनोपकण्ठात् परित्यज्य गते लक्ष्मणे सीता देवी प्राप्तप्रसववेदना[1]मात्मानमतिदुःखसंवेगाद्भागीरथीप्रवाहे निक्षिप्तवती। तदैव तत्र दारकद्वयं प्रसूता[2]। भगवतीभ्यां पृथ्वीभागीरथीभ्यामभ्युपपन्ना रसातलं च नीता। स्तन्यत्यागात् परेण च तद्दारकद्वयं तस्याः प्राचेतसस्य महर्षेर्गङ्गादेवी[3] स्वयमर्पितवती।

मुरला। (सविस्मयम्)

ईदृशानां विपाकोऽपि जायते परमाद्भुतः।
यत्रोपकरणीभावमायात्येवंविधो जनः ॥ २ ॥

तमसा। इदानीं तु शम्बूकवृत्तान्तेनानेन संभावितजनस्थानागमनं[4][5] रामभद्रं सरयूमुखादुपश्रुत्य भगवती भागीरथी यदेव भगवत्या लोपामुद्रया स्नेहादाशङ्कितं तदेवाशङ्क्य सीतासमेता केनचिदिव गृहाचारव्यपदेशेन गोदावरीं विलोकयितुमागता[6]।

---

१ प्राप्तप्रसववेदना।
२ प्रासूत।
३ गङ्गादेव्या स्वयमर्पितम्।
४ शम्बूकवधवृत्तान्तेन।
५ जनस्थानगमनम्।
६ गोदावरीमुपागता।

Digitized by Google

मुरला । सुविचिन्तितं भगवत्या भागीरथ्या । राजधानीस्थितस्य खलु तैस्तैर्जगतामाभ्युदयिकैः कार्यैर्व्यापृतस्य रामभद्रस्य नियताः चित्तविक्षेपाः । अव्यग्रस्य पुनरस्य शोकमात्रद्वितीयस्य पञ्चवटीप्रवेशो महाननर्थ[1] इति । तत्कथमिदानीं सीतादेव्या रामभद्र आश्वासनीयः स्यात् ।

तमसा । उक्तमेव[2] भगवत्या भागीरथीदेव्या वत्से देवयजनसंभवे[3] सीते अद्य खल्वायुष्मतोः कुशलवयोर्द्वादशसंवत्सरस्य[4] संख्यामङ्गलग्रन्थिरभिबध्यते[5] । तदात्मनः पुराणश्वशुरमेतावतो मानवस्य राजर्षिवंशस्य प्रसवितारं सवितारमपहतपाप्मानं देवं स्वहस्तावचितैः पुष्पैरुपतिष्ठस्व । न च त्वामवनिपृष्ठचारिणीमस्मत्प्रभावाद्वनदेवता अपि द्रक्ष्यन्ति[6] किं पुनर्मर्त्या इति । अहंचाज्ञापिता[7] तमसे त्वयि प्रकृष्टप्रेमैव वधूर्वत्सा जानक्यतस्त्वमेवास्याः प्रसन्तरीभवेति । साहमधुना यथादिष्टमनुतिष्ठामि ।

मुरला । अहमप्यमुं वृत्तान्तं भगवत्यै लोपामुद्रायै निवेदयामि । रामभद्रोऽप्यागत एवेति तर्कयामि ।

तमसा । तदियं गोदावरीह्रदान्निष्क्रम्य

परिपाण्डुदुर्बलकपोलसुन्दरं
दधती विलोलकबरीकमाननम् ।
करुणस्य मूर्तिरथवा शरीरिणी
विरहव्यथैव वनमेति जानकी ॥ ४ ॥

---

१ महाननर्थ इति शङ्के ।
२ उक्तमेव ।
३ यद्देवयजनसंभवे ।
४ द्वादशजन्मसंवत्सरस्य ।
५ अभिवर्तते ।
६ अवनीपृष्ठवर्तीनीम् ।
७ अहं च ज्ञापिता ।
८ करुणस्य मूर्तिरिव वा शरीरिणी । विरहव्यथेव वनमेति जानकी ।

Digitized by Google

मुरला। इयं हि सा

किसलयमिव मुग्धं बन्धनाद्विप्रलूनं
हृदयकुसुमशोषी दारुणो दीर्घशोकः।
ग्लपयति परिपाण्डु क्षाममस्याः शरीरं
शरदिज इव घर्मः केतकीगर्भपत्रम् ॥ ५ ॥

(परिक्रम्य निष्क्रान्ते)

विष्कम्भकः।

(नेपथ्ये)

प्रमोदः प्रमादः।

(ततः प्रविशति पुष्पावचयव्यग्रा[3] सकरुणौत्सुक्यमाकर्णयन्ती सीता)।

सीता। अम्महे जाणामि पिअसही मे वासन्ती वाहरदि दि (अम्महे जानामि प्रियसखी मे वासन्ती व्याहरतीति)

(पुनर्नेपथ्ये)

सीतादेव्याः स्वकरकलितैः शल्लकीपल्लवाग्रै-
रग्रे लोलः करिकरभको यः पुरा पोषितोऽभूत्।

सीता। किं तस्स (किं तस्य)

(पुनर्नेपथ्ये)

वध्वा सार्द्धं पयसि विरहन् सोऽयमन्येन दर्पा-
दुद्दामेन द्विरदपतिना सन्निपत्याभियुक्तः ॥ ६ ॥

सीता। (ससंभ्रमं कतिचित् पदानि दधती) अज्जउत्त परित्ताहि परित्ताहि मम तं पुत्तअं। (स्मृतिमभिनीय सवैक्लव्यम्) हद्धि हद्धि ताइ ज्जेव चिरपरिचिदाइं अक्ख-

---

१ दाही।
२ This is ommitted in some editions.
३ व्यग्रहस्ता।
४ वेगात्।

Digitized by Google

राइं पञ्चवटीदंसणेण पुणो वि[1] मं मन्दभाइणिं अणुरुन्धन्ति । हा अज्जउत्त । (आर्यपुत्र परित्रायस्व परित्रायस्व मम तं पुत्रकम् । हा धिक् हा धिक् तान्येव चिरपरिचितान्यक्षराणि पञ्चवटीदर्शनेन पुनरपि मां मन्दभागिनीमनुरुध्यन्ते । हा आर्यपुत्र) । (इति मूर्च्छति)

(प्रविश्य)

तामसा । वत्से समाश्वासिहि । समाश्वसिहि ।

(नेपथ्ये)

विमानराज अत्रैव स्थीयताम् ।

सीता । (आश्वस्य ससाध्वसोल्लासम्) **अम्महे जलभरिदमेहत्थणिदगम्भीरमंसलो कुदो णु एसो भारदीणिग्घोसो भरिज्जमाणकण्णविवरं मं वि मन्दभाइणिं झत्ति उस्सावेदि** (अम्महे जलभरितमेघस्तनितगम्भीरमांसलः कुतोन्वेष भारतीनिर्घोषो भ्रियमाणकर्णविवरां मामपि मन्दभागिनीं झटित्युच्छ्वासयति) ।

तमसा । (सस्नेहास्रम्) **अयि वत्से**

किमव्यक्तेऽसि[3] निनदे कुतस्त्येऽपि त्वमीदृशी ।
स्तनयित्नोर्मयूरीव चकितोत्कण्ठितं[4] स्थिता ॥ ७ ॥

सीता । भवआदि किं भणासि अपरिप्फुडं ति । मए उण सरसञ्जोएण पच्चभिआणिदं अज्जउत्तो एव वाहरदि (भगवति किं भणसि अपरिस्फुटमिति । मया पुनः स्वरसंयोगेन प्रत्यभिज्ञातमार्यपुत्रएव व्याहरति) ।

---

१ मं मन्दभाइणीं अणुवन्धन्ति (मां मन्दभागिनीमनुषध्नन्ति) ।

२ समाश्वस्य ससाध्वसोत्कम्पोल्लासम् ।

३ अपरिस्फुटनिक्काणेकुतस्त्येऽपि त्वमीदृशी
किमव्यक्तेऽपि निनदे कुतस्ते प्रीतिरीदृशी ।

४ उत्कण्ठिता ।

५ अज्जउत्तेण वाहरिदं (आर्यपुत्रेण व्याहरितम् ।)

Digitized by Google

तमसा। श्रूयते तपस्यतः किल शूद्रस्य दण्डधारणार्थमैक्ष्वाको राजा जनस्थानमागत इति।

सीता। दिट्ठिआ अपरिहीणराअधम्मो क्खु सो राआ (दिष्ट्याऽपरिहीणराजधर्मः खलु स राजा)।

(नेपथ्ये)

यत्र द्रुमा अपि मृगा अपि बन्धवो मे
यानि प्रियासहचरश्चिरमध्यवात्सम्।
एतानि तानि बहुनिर्झरकन्दराणि
गोदावरीपरिसरस्य गिरेस्तटानि ॥ ८ ॥

सीता। (दृष्ट्वा) हा कहं पहादचन्दमण्डलावण्डुरपरिक्खामदुब्बलेण आआरेण अअं[1] सो गम्भीराणुभावमेत्तपच्चभिआणिदो अज्जउत्तो एव ता मं धारेहि (हा कथं प्रभातचन्द्रमण्डलापाण्डुरपरिक्षामदुर्बलेनाकारेणायं स गम्भीरानुभावमात्रप्रत्यभिज्ञात आर्यपुत्र एव तन्मां धारय)। (इति तमसामाश्लिष्य मूर्च्छति)

तमसा। (धारयन्ती) वत्से समाश्वसिहि समाश्वसिहि

(नेपथ्ये)

अनेन पञ्चवटीदर्शनेन

अन्तर्लीनस्य दुःखाग्नेरद्योद्दामं ज्वलिष्यतः।
उत्पीड इव धूमस्य मोहः प्रागावृणोति माम् ॥९॥

हा प्रिये जानकि।

तमसा। (स्वगतम्) इदं तदाशङ्कितं गुरुजनेनापि।

सीता। (समाश्वस्य) हा कहं एदं (हा कथमेतत्)।

---

१ अअं विअ सोम्मगम्भिराणुभावमेत्त (अयं निज सौम्यगम्भिरानुभावमात्र)।

Digitized by Google

(पुनर्नेपथ्ये)

हा देवि दण्डकारण्यवासप्रियसखि हा देवि विदेहराजपुत्रि । (इति मूर्च्छति)

सीता । हद्धी हद्धी मं मन्दभाइणिं वाहरिअ आमीलन्तणेत्तणीलुप्पलो मुच्छिदो एव अज्जउत्तो हा कहं धरणीवट्ठे निरुस्साहणीसहं विपल्लत्थो । भअवदि तमसे परित्ताहि जीआवेहि अज्जउत्तं[1] (हा धिक् हा धिक् मां मन्दभागिनीं व्याहृत्यामीलन्नेत्रनीलोत्पलो मूर्च्छित एवार्यपुत्रः । हा कथं धरणीपृष्ठे निरुत्साहनिःसहं विपर्यस्तः । भगवति तमसे परित्रायस्व परित्रायस्व जीवयार्यपुत्रम्) । (इति पादयोः पतति)

तमसा ।

त्वमेव ननु कल्याणि सञ्जीवय जगत्पतिम् ।
प्रियस्पर्शो हि पाणिस्ते तत्रैव[2] निरतो भरः ॥ १० ॥

सीता । जं होदु तं होदु जहा भअवदी भणादि (यद् भवतु तद् भवतु यथा भगवती भणति) । (ससंभ्रमं निष्क्रान्ता)

(ततः प्रविशति भूमौ निपतितः सास्रया सीतया स्पृश्यमानः साह्लादोच्छ्वासो रामः)

सीता । (किञ्चित् सहर्षं स्वगतम्) जाणे पुणो वि पच्चाअदं विअ जीविदं तेल्लोअणाहस्स (जानामि पुनरपि प्रत्यागतमिव जीवितं त्रिलोकनाथस्य) ।

रामः । हन्त भोः किमेतत्

प्रश्नोतनं नु हरिचन्दनपल्लवानां
निष्पीडितेन्दुकरकन्दलजो नु सेकः ।

---

१ उद्दिसिअ (उद्दिश्य) ।
२ तत्रैव निरतो भवः ।
यत्रैष निरतो जनः ।
यत्रैव निरतो जनः ।
तत्रैव नियतो भवः ।
तत्रैव नियता भव ।

Digitized by Google

आतप्तजीवितततरोः परितर्पणो मे
सञ्जीवनौषधिरसो नु हृदि प्रसिक्तः ॥ ११ ॥
स्पर्शः पुरा परिचितो नियतं स एष
सञ्जीवनश्च मनसः परिमोहणश्च ।
सन्तापजां सपदि यः प्रतिहत्य मूर्च्छा-
मानन्दनेन जडतां पुनरातनोति ॥ १२ ॥

सीता । (ससाध्वसोत्कम्पमपसृत्य) एत्तिअं एव दाणिं मे चहुदरं (एतावदेवेदानीं मे बहुतरम्) ।

रामः । (उपविश्य) न खलु वत्सलया सीतादेव्याऽभ्युपपन्नोऽस्मि ।

सीता । हद्धी हद्धी कित्ति मं अज्जउत्तो मग्गिस्सादि (हा धिक् हा धिक् किमिति मामार्यपुत्रो मार्गिष्यति) ।

रामः । भवतु पश्यामि ।

सीता । भअवदि तमसे ओसरह्म । जइ दाव मं पेक्खिस्सादि तदो अणब्भणुण्णादसण्णिधाणेण अहिअदरं मम महाराओ कुविस्सदि (भगवति तमसे अपसरावः । यदि तावन्मां प्रेक्षिष्यते तदानभ्यनुज्ञातसन्निधानेनाधिकतरं मम महाराजः कोपिष्यति) ।

तमसा । अयि वत्से भागीरथीवरप्रभावात् वनदेवतानामप्यदृश्यासि संवृत्ता ।

सीता । आं अत्थि एदं (आं अस्त्येतत्) ।

रामः । हा प्रिये जानकि । ननु प्रिये जानकि ।

सीता । (समन्युगद्गदम्) अज्जउत्त असरिसं क्खु एदं

---

१ आतप्तजीवनमनः । | ३ प्रसादात् ।
२ ससाध्वकरुणं किंचिदपसृत्य । | ४ प्रिये जानकि ।

Digitized by Google

वअणं इमस्स वुत्तन्तस्स । (सास्रम्) अहवा किंत्ति वज्जमई जम्मन्तरे सम्भाविददुल्लहदंसणस्स मं एव मन्दभाइणिं उद्दिसिअ वच्छलस्स एवंवादिणो अज्जउत्तस्स उवरि णिरणुक्कोसा भविस्सं । अहं एदस्स हिअअं आणामि मम एसो त्ति (आर्यपुत्र असदृशं खल्वेतद्वचनमस्य वृत्तान्तस्य । अथवा किमिति वज्रमयी जन्मान्तरे सम्भावितदुर्लभदर्शनस्य मामेव मन्दभागिनीमुद्दिश्य वत्सलस्यैवंवादिन आर्यपुत्रस्योपरि निरनुक्रोशा भविष्यामि । अहमेतस्य हृदयं जानामि मम एष इति) ।

रामः । (सर्वतोविलोक्य सनिर्वेदम्) हा कथमत्र न कश्चिदपि ।

सीता । भअवदि तमसे तहा णिक्कारणपरिच्चाइणो वि एदस्स एवंविहेण दंसणेण केरिसो विअ मे हिअआणुबन्धो त्ति ण आणामि (भगवति तमसे तथा निष्कारणपरित्यागिनोप्येतस्यैवंविधेन दर्शनेन कीदृश इव मे हृदयानुबन्ध इति न जानामि)

तमसा । जानामि वत्से जानामि

तटस्थं नैराश्यादपिच कलुषं विप्रियवशा-
द्वियोगे दीर्घेऽस्मिन् झटिति घटनोत्तम्भितमिव ।
प्रसन्नं सौजन्याद्दयितकरुणैर्गाढकरुणं
द्रवीभूतं प्रेम्णा तव हृदयमस्मिन् क्षण इव ॥१३॥

---

१ वज्जमई विअ जम्मन्तरेसु वि पुणो असंभाविद दुल्लहदंसणस्स । (वज्रमयीव जन्मान्तरेष्वपि पुनोऽसंभावितदुर्लभदर्शनस्य) ।

२ हा न काचिदत्र ।
हा न कश्चिद् ।
हा कथमत्र न कश्चिदपि ।

३ एदस्स एदिण एवंविहेण दंसणेन कीदिसी मे हिअआवत्था (एतस्यैतेनैवंविधेन दर्शनेन कीदृशी मे हृदयावस्था) ।

Digitized by Google

रामः। देवि

प्रसाद इव मूर्तस्ते स्पर्शः स्नेहार्द्रशीतलः।
अद्याप्यानन्दयति मां त्वं पुनः कासि नन्दिनि॥१४॥

सीता। एदे क्खु दे[1] अगाधदंसिदसिणेहसम्भारा आणन्दणिस्सन्दिणो सुदा मए अज्जउत्तस्स उल्लावा। आणं पच्चएण णिक्कारणपरिच्चाअसल्लिदो वि बहुमदो मे जम्मलाहो (एते खलु तेऽगाधदर्शितस्नेहसंभारा आनन्दनिष्यन्दिनः श्रुतामयाऽऽर्यपुत्रस्योल्लापाः। येषां प्रत्ययेन निष्कारणपरित्यागशल्यितोऽपि बहुमतो मे जन्मलाभः)।

रामः। अथवा कुतः प्रियतमा। नूनं[3] संकल्पाभ्यासपाटवोपादान एष रामभद्रस्य भ्रमः।

(नेपथ्ये)

प्रमादः प्रमादः। (सीतादेव्याः स्वकरकलितैरित्यर्धं पठ्यते)

रामः। (सकरुणौत्सुक्यम्) किं तस्य।

(पुनर्नेपथ्ये)

(वद्वासार्धमित्युत्तरार्द्धं पठ्यते)

सीता। को दाणिं अहिउज्जिस्सदि (क इदानीमभियोक्ष्यते)।

रामः। कासौ कासौ दुरात्मा यः प्रियायाः पुत्रकं बधूद्वितीयमाभिभवति। (इत्युत्तिष्ठते)

---

१ अद्याप्येवार्द्रयति।

२ एदे क्खु अगाधमाणसिणेहसंभवा आणन्द णिस्सन्दिणो सुहामआ अज्जउत्तस्स आलावा (एते खल्वगाधमानस्नेहसंभवा आनन्दनिस्यन्दिनः सुधामयाऽऽर्यपुत्रस्यालापाः)।

३ नूनं सकल्पावभासपाटवोपादान एष रामस्य भ्रमः। नूनं संकल्पाभ्यासपाटवोत्पादः।

Digitized by Google

(प्रविश्य)

सम्भ्रान्ता वासन्ती । कथं देवो रघुपतिः ।

सीता । कहं पिअसही मे वासन्ती (कथं प्रियसखी मे वासन्ती) ।

वासन्ती । जयतु जयतु देवः ।

रामः । (निरूप्य) कथं देव्याः प्रियसखी वासन्ती ।

वासन्ती । देव त्वर्यतां त्वर्यतामितो जटायुशिखरिदक्षिणेन सीतातीर्थेन गोदावरीमवतीर्य संभावयतु देव्याः पुत्रकं देवः ।

सीता । हा ताद जटाओ अज्ज सुण्णं तुए विणा जणट्ठाणं (हा तात जटायो अद्य शून्यं त्वया विना जनस्थानम्) ।

रामः । अहह हृदयमर्माच्छिदः खल्वमी कथोद्घाताः ।

वासन्ती । इत इतो देवः ।

सीता । भअवदि सच्चअं एव वणदेवदा वि मं ण पेक्खन्दि (भगवति सत्यमेव वनदेवता अपि मां न प्रेक्षन्ते) ।

तमसा । आयि वत्से सर्वदेवताभ्यः प्रकृष्टमैश्वर्यं मन्दाकिनीदेव्यास्तत् किमित्याशङ्कसे ।

सीता । तदो अणुसरअ (ततोऽनुसरावः) ।

(इति परिक्रामतः)

रामः । (परिक्रम्य) भगवति गोदावरि नमस्ते ।

वासन्ती । (निरूप्य) देव देव मोदस्व विजयिना वधूद्वितीयेन देव्याः पुत्रकेण ।

रामः । विजयतामायुष्मान् ।

सीता । अम्महे एरिसो एसो सो संवुत्तो (अम्महे ईदृश एष स संवृत्तः) ।

रामः । देवि दिष्ट्या वर्धसे

Digitized by Google

येनोद्गच्छद्विसकिसलयस्निग्धदन्ताङ्कुरेण
व्याकृष्टस्ते सुतनु लवलीपल्लवः कर्णपूरात्।
सोऽयं पुत्रस्तव मदमुचां वारणानां विजेता
यत् कल्याणं वयसि तरुणे भाजनं तस्य जातः १५

सीता। अविउत्तो दाणीं अअं दीहाउ इमाए सोम्मदंसणाएं होदु (अवियुक्त इदानीमयं दीर्घायुनया सौम्यदर्शनया भवतु)।

रामः। सखि वासन्ति पश्य पश्य कान्तानुवृत्तिचातुर्यमपि शिक्षितं वत्सेन

लीलोत्खातमृणालकाण्डकवलच्छेदेषु संपातितैः
पुष्यत्पुष्करवासितस्य पयसो गण्डूषसंक्रान्तयः।
सेकः शीकरिणा करेण विहितः कामं विरामे पुनर्
यत्स्नेहादनरालनालनलिनीपत्रातपत्रं धृतम् ॥१६॥

सीता। भअवदि तमसे अअं दाव एरिसो जादो। देउण ण आणामि कुसलवा एत्तिएण कालेण केरिसा संवुत्तं-ति (भगवति तमसे अयं तावदीदृशः जातः। तौ पुनर्न जाने कुशलवा एतावता कालेन कीदृशौ संवृत्ता इति।

तमसा। यादृशोऽयं तादृशौ तावपि।

सीता। एरिसी अहं मन्दभाइणी जाए ण केवलं णिरन्तरं अज्जउत्तविरहो पुत्तविरहो वि (ईदृश्यहं मन्दभागिनी यस्या न केवलं निरन्तरमार्यपुत्रविरहः पुत्रविरहोऽपि)।

तमसा। भवितव्यतेयमीदृशी।

सीता। किं वा मए पसूदाए जेण तारिसाणं मम पुत्तकाणं इसिविरलकोमलधअलदसणुज्जलकवोलं अणुबद्धमु-

---

१ सोम्मदंसणाए समं होदु (सौम्यदर्शनया समं भवतु)।

२ संपादिताः।

Digitized by Google

द्ध काअलिविहसिदं णिबद्धकाअसिहण्डअं अमलमुहपुण्ड-रीअजुअलं ण परिचुम्बिदं अज्जउत्तेण (किंवा मया प्रसूतया येन तादृशयोर्मम पुत्रयोरीषद्विरलकोमलधवलदशनोज्वल-कपोलमनुबद्धमुग्धकाकलीविहसितं निबद्धकाकाशिखण्डकममल-मुखपुण्डरीकयुगलं न परिचुम्बितमार्यपुत्रेण)।

तमसा। अस्तु देवताप्रसादात्।

सीता। भअवदि तमसे एदिणा अवच्चसंसुमरणेण उस्स सिदपण्हुदत्थणी ताणं अ पिदुणो सण्णिधाणेण खणमेत्तं संसारिणी म्हि संवुत्ता (भगवति तमसे एतेनापत्यसंस्मरणे-नोच्छ्वसितप्रस्नुतस्तनी तयोश्च पितुः सन्निधानेन क्षणमात्रं सं-सारिण्यस्मि संवृत्ता.)।

तमसा। किमत्रोच्यते प्रसवः खलु प्रकर्षपर्यन्तःस्नेहस्य। परं[1] चैतदन्योन्यसंश्लेषणं पित्रोः

अन्तःकरणतत्वस्य दम्पत्योः स्नेहसंश्रयात्।
आनन्दग्रन्थिरेकोऽयमपत्यमिति बध्यते ॥१७॥

वासन्ती। इतोऽपि देवः पश्यतु

अतरुणमदताण्डवोत्सवान्ते[2]-
ष्वयमचिरोद्भूतमुग्धलोलबर्हः।
मणिमुकुट इवोच्छिखः कदम्बे
नदति स एष वधूसखः शिखण्डी ॥ १८ ॥

सीता। (सकौतुकास्मम्) एसो सो एसो सो (एष स एष सः)।

रामः। मोदस्व वत्स मोदस्व।

सीता। एवं होदु (एवं भवतु)।

---

१ परं च। | २ ताण्डवोत्सवान्ते स्वयम्।

Digitized by Google

रामः। भ्रमिषु कृतपुटान्तर्मण्डलावृत्ति[1] चक्षुः
प्रचलितचतुरभ्रूताण्डवैर्मण्डयन्त्या।
करकिसलयतालैर्मुग्धया नर्त्यमानं
सुतमिव मनसा त्वां वत्सलेन स्मरामि ॥१९॥

हन्त तिर्यञ्चोऽपि परिचयमनुरुध्यन्ते।
कतिपयकुसुमोद्गमः कदम्बः
प्रियतमया परिवर्धितो य आसीत्।

सीता। (निरूप्य सास्रम्) सुट्ठु पच्चहिआणिदं अज्जउत्तेण (सुष्ठु प्रत्यभिज्ञातमार्यपुत्रेण)।

रामः। स्मरति गिरिमयूर एष देव्याः
स्वजन इवात्र यतः प्रमोदमेति ॥ २० ॥

वासन्ती। अत्र तावदासनपरिग्रहं करोतु देवः।
एतत्तदेव कदलीवनमध्यवर्ति
कान्तासखस्य शयनीयशिलातलं ते।
अत्र स्थिता तृणमदाद्बहुशो यदेभ्यः
सीता ततो हरिणकैर्न विमुच्यते स्म ॥ २१ ॥

रामः। इदं तावदशक्यमेव द्रष्टुम्। (इत्यन्यतो मुखमुपविशति)

सीता। सहि वासन्ति किं तुए कअं अज्जउत्तस्स मम अ एदं दंसअन्तीए। हद्धी हद्धी सो एव अज्जउत्तो तं एव पञ्चवटीवणं सा एव पिअसही वासन्ती ते एव विविहवीसम्भसाक्खिणो गोदावरीकाणणुद्देसा ते एव जादणिव्विसेसा मअपक्खिवादवा मम उण मन्दभाइणीए दीसमाणं वि सव्वं एव एदं णत्थि ता एरिसो जीअलोअस्स परिवत्तो (सखि वासन्ति किं त्वया कृतमार्यपुत्रस्य मम चैतद् दर्शयन्त्या। हा धिक् हा धिक् स एवार्यपुत्रस्तदेव पञ्चवटीवनं सा एव प्रियसखी वासन्ती त एव विविधविस्रम्भसाक्षिणो गोदावरी

---

1 मण्डलावृत्तचक्षुः।

काननोद्देशास्त एव जातनिर्विशेषो मृगपक्षिपादपा मम पुनर्मन्द-भागिन्या दृश्यमानमपि सर्वमेवैतन्नास्ति तदीदृशो जीवलोकस्य परिवर्त्तः) ।

वासन्ती । सखि सीते कथं न पश्यसि रामस्यावस्थाम्

कुवलयदलस्निग्धैरङ्गैर्ददौ नयनोत्सवं
सततमपि ते स्वेच्छादृश्यो नवो[1] नव एव यः ।
विकलकरणः पाण्डुच्छायः[2] शुचा परिदुर्बलः
कथमपि स इत्युन्नेतव्यस्तथापि दशां[3] प्रियः ॥२२॥

सीता । पेक्खामि महि पेक्खामि (प्रेक्षे सखि प्रेक्षे) ।

तमसा । पश्यन्ती प्रियं भूयाः ।

सीता । हा देव एसो मए विणा अहं एदेण विणा त्ति केण सम्भाविदं आसि । ता मुहुत्तअं वि जम्मन्तरादो विअ लद्धदंसणं बाहसलिलन्तरेसु पेक्खामि दाव वच्छलं अज्जउत्तं (हा दैव एष मया विनाहमेतेन विनेति केन संभावितमासीत् । तन्मुहूर्तकमपि जन्मान्तरत इव लब्धदर्शनं बाष्पसलिलान्तरेषु प्रेक्षे तावद् वत्सलमार्यपुत्रकम्) । (इति सतृष्णं पश्यति) ।

तमसा । (सस्नेहास्त्रं परिष्वज्य)

विलुलितमतिपुरैर्बाष्पमानन्दशोक-
प्रभवमवस्रजन्ती तृष्णयोत्तानदीर्घा ।
स्नपयति हृदयेशं स्नेहनिष्यन्दिनी ते
धवलबहलमुग्धा दुग्धकुल्येव दृष्टिः ॥ २३ ॥

वासन्ती । ददतु तरवः पुष्पैरर्घ्यं फलैश्च मधुश्रुतः
स्फुटितकमलामोदप्राया[4]: प्रवान्तु वनानिलाः ।

---

१ नवं नवमेवयः
२ पाण्डुः सोऽयं ।
३ दृशोः ।

कलमविरलं[1] रत्युत्कण्ठाः क्वणन्तु शकुन्तयः
पुनरिदमयं देवो रामः स्वयं वनमागतः ॥ २४ ॥

रामः। एहि सखि वासन्ति नन्दितः स्थीयताम्।

वासन्ती। (उपविश्य सास्रम्) महाराज अपि कुशलं कुमार लक्ष्मणस्य।

रामः। (अश्रुतिमभिनीय)

करकमलवितीर्णैरम्बुनीवारशष्पै-[2]
स्तरुशकुनिकुरङ्गान् मैथिली यानपुष्यत्।
भवति मम विकारस्तेषु दृष्टेषु कोऽपि
द्रव इव हृदयस्य प्रस्तरोद्भेदयोग्यः ॥ २५ ॥

वासन्ती। महाराज ननु पृच्छाम्यपि कुशलं कुमार-लक्ष्मणस्य।

रामः। (स्वगतम्) अये महाराजेति निष्प्रणयमामन्त्रणपदं सौमित्रिमात्रे च बाष्पस्खलिताक्षरः कुशलप्रश्नः। तथा मन्ये विदितसीतावृत्तान्तेयमिति। (प्रकाशम्) आं कुशलं कुमारस्य। (रोदिति)

वासन्ती। अयि देव दारुणः स्वल्वसि।

सीता। सहि वासन्ति किं तुमं सि एवं वादिणी। पिआरुहो क्ख सव्वस्स अज्जउत्तो विसेसदो मम पिअसहीए[3] (सखि वासन्ति किं त्वमस्येवं वादिनी। प्रियार्हः खलु सर्वस्यार्यपुत्रो विशेषतो मम प्रियसख्याः)।

वासन्ती। त्वं जीवितं त्वमसि मे हृदयं द्वितीयं
त्वं कौमुदी नयनयोरमृतं त्वमङ्गे।

---

१ अविकलं।
२ विकीर्णैः
३ पिअसहीणं (प्रियसखीनां)।

Digitized by Google

इत्यादिभिः प्रियशतैरनुरुध्य मुग्धां
तामेव शान्तमथवा किमिहोत्तरेण ॥ २६ ॥

(इति मूर्च्छति)

रामः । स्थाने खलु वाक्यनिवृत्तिर्मोहश्च । सखि समाश्वसिहि समाश्वसिहि ।

वासन्ती । (समास्वस्य) तत् किमिदमकार्यमनुष्ठितं देवेन ।

सीता । सहि वासन्ति विरम विरम (सखि वासन्ति विरम विरम) ।

रामः । लोको न मृष्यतीति ।

वासन्ती । तत् कस्य हेतोः ।

रामः । स एव जानाति किमपि ।

तमसा । उचितस्तदुपालम्भः ।

वासन्ती । अयि कठोर यशः किल ते प्रियं
किमयशो ननु घोरमतः परम् ।
किमभवद्विपने हरिणीदृशः
कथय नाथ कथं बत मन्यसे ॥ २७ ॥

सीता । तुमं एव सहि वासन्ति दारुणा कठोरा अ जा एवं अज्जउत्तं पलित्तं[1] पदीवेसि (त्वमेव सखि वासन्ति दारुणा कठोरा च यैवमार्यपुत्रं प्रदीप्तं प्रदीपयसि) ।

तमसा । प्रणय एवं[2] व्याहरति शोकश्च ।

रामः । सखि किमत्र मन्तव्यम्

अस्तैकहायनकुरङ्गविलोलदृष्टे-
र्हृतस्याः परिस्फुरितगर्भभरालसायाः ।

---

१ अ एवं विलपन्ती पदीवेसि (यैवं विलपन्ती प्रदीपयसि)।

२ एवेदं व्याहरति ।

Digitized by Google

ज्योत्स्नामयीव मृदुबालमृणालकल्पा
कन्याद्विरङ्गलतिका नियतं विलुप्ता ॥ २८ ॥

सीता। अज्जउत्त एसा घरामि (आर्यपुत्र एषा म्रिये)।

रामः। हा प्रिये जानकि क्वासि।

सीताः। हद्धी हद्धी अज्जउत्तो वि पमुक्ककण्ठं रोइदि (हा धिक् हा धिक् आर्यपुत्रोऽपि प्रमुक्तकण्ठं रोदिति)।

तमसा। वत्से साम्प्रतिकमेवैतत् कर्तव्यानि दुःखितैर्दुःखनिर्वापणानि। यतः

पूरोत्पीडे तडागस्य परीवाहः प्रतिक्रिया।
शोकक्षोभे च हृदयं प्रलापैरेव धार्यते ॥ २९ ॥

विशेषतो रामभद्रस्य बहुतरप्रकारकष्टो जीवलोकः।

इदं विश्वं पाल्यं विधिवदभियुक्तेन मनसा
प्रियाशोको जीवं कुसुममिव घर्मः क्लमयति।
स्वयं कृत्वा त्यागं विलपनविनोदोऽप्यसुलभ-
स्तदद्याप्युच्छ्वासो भवति ननु लाभो हि रुदितम्॥३०॥

रामः। कष्टं भोः कष्टम्

दलति हृदयं गाढोद्वेगं द्विधा न तु भिद्यते
वहति विकलः कायो मोहं न मुञ्चति चेतनाम्।
ज्वलयति तनूमन्तर्दाहः करोति न भस्मसात्
प्रहरति विधिर्मर्मच्छेदी न कृन्तति जीवितम् ॥३१॥

---

१ मृदुमुग्धमृणालकल्पा।
२ सांप्रतं युक्तान्येवैतानि कर्तव्यानि यतो रोदनान्येव दुःखितस्य दुःखनिर्वापणानि भवन्ति। सांप्रतिकं वैतत्कर्तव्यानि दुःखितैर्दुःखनिर्वापणानि।
३ विशेषतो रामभद्रस्य। यस्य बहुप्रकारकष्टो जीवलोकः।
४ विरुदितम्।
५ गाढोद्वेगः।
६ तु न भिद्यते।

Digitized by Google

सीता । एवण्णेदं (एवन्विदम्) ।

रामः । हे भवन्तः पौरजानपदाः

न किल भवतां स्थानं देव्या गृहेऽभिमतं तत-
स्तृणमिव वने शून्ये सक्ता न चाप्यनुशोचिता ।
चिरपरिचितास्ते ते भावाः परिभ्रमयन्ति मा-
मिदमशरणैरद्याप्येवं प्रसीदत रुद्यते ॥ ३२ ॥

तमसा । अतिगम्भिरमापूरणं शोकसागरस्य ।

वासन्ती । देव अतिक्रान्ते धैर्यमवलम्ब्यताम् ।

रामः । सखि किमुच्यते धैर्यमिति

देव्या शून्यस्य जगतो द्वादशः परिवत्सरः ।
लुप्तं सीतेति नामापि न च रामो न जीवति ॥ ३३ ॥

सीता । मोहिद ह्मि एदेहिं अज्जउत्तवअणेहि (मोहितास्म्येतैरार्यपुत्रवचनैः) ।

तमसा । एवं वत्से

नैताः प्रियतमा वाचः स्नेहार्द्राः शोक दारुणाः ।
एतास्तामधुनो धारा श्च योतन्ति सविषास्त्वयि ॥ ३४ ॥

रामः । आयि वासन्ति मया खलु

यथा तिरश्चीनमलातशल्यं ।
प्रत्युप्तमन्तः सविषश्च दंशः
तथैव तीव्रो हृदि शोक शङ्कु-
र्मर्माणि कृन्तन्नपि किं न सोढः ॥ ३५ ॥

---

१ नवाप्यनुशोचिता ।
२ परिद्रवयन्ति ।
३ इदमशरणैरद्यास्माभिः ।
किमिह शरणं नाद्यापेः ।
४ अतिगम्भीरमपूरणं ।
५ प्रणष्टमिव नामापि ।
न च सीतेति नामापि ।

Digitized by Google

सीता। एवं खु मन्दभाइणी पुणो वि आआसआरिणी अज्जउत्तस्स (एवमस्मि मन्दभागिनी पुनरप्यायासकारिण्यार्यपुत्रस्य)।

रामः। एवमतिनिष्कम्पस्तम्भितान्तःकरणस्यापि मम संस्तुततत्तत्प्रियवस्तुदर्शनादद्यायमावेगः। तथाहि

लोलोल्लोलक्षुभितकरेणोज्जृम्भणस्तभनार्थं
यो यो यत्नः कथमपि मया धीयते तं तमन्तः।
भित्वा भित्वा प्रसरति बलात् कोऽपि चेतोविकार-
स्तोयस्येवाप्रतिहतरयः सैकतं सेतुमोघः॥ ३६॥

सीता। एदिणा अज्जउत्तस्स दुव्वारदारुणारम्भेण दुःखसंखोहेण मुसिअ णिअ दुक्खं वि किं पि पमुद्धं विअ हिअअं (एतेनार्यपुत्रस्य दुर्वारदारुणारम्भेण दुःखसंक्षोभेण मुषितनिजदुःखं किमपि प्रमुग्धमिव हृदयम्)।

वासन्ती। (स्वगतम्) कष्टमभ्यापन्नो देवस्तदन्यतः क्षिपामितावत् (प्रकाशम्) चिरपरिचितानेतान् जनस्थानभागानवलोकयतु देवः।

रामः। एवमस्तु। (इत्युत्थाय परिक्रमति)

सीता। सन्दीवणाइं एव दुःखस्स पिअसही विणोदणोवाओ त्ति मण्णोदि (सन्दीपनान्येव दुःखस्य प्रियसखी विनोदनोपाय इति मन्यते)।

वासन्ती। (सकरुणम्) देव देव

---

१ संस्तुतबहुतरप्रियदर्शनादुद्भ्रामोऽयमावेगः।

२ करुणो

३ दुःख संखोहेण पप्फुरिद निअदुक्खं वि अ आकम्पिदं मे हिअअं (दुःखसंक्षोभेण प्रस्फुरित निजदुःखमिवाकम्पितं मे हृदयं)।

४ चिरपरिचितानीदानीं जनस्थानभागानवलोकनेन मानयतु देवः।
चिरपरिचितानामिदानीं जनस्थानभागानावलोकनेनात्मानमानन्दयतु देवः।

Digitized by Google

अस्मिन्नेव लतागृहे त्वमभवस्तन्मार्गदत्तेक्षणः
सा हंसैः कृतकौतुका चिरमभूद्गोदावरीसैकते ।
आयान्त्या परिदुर्मनायितमिव त्वां वीक्ष्य बद्धस्तया
कातर्यादरविन्दकुड्मलनिभो मुग्धः प्रणामाञ्जलिः ३७

सीता । दारुणा सि सहि वासन्ति दारुणा सि जा एदेहि हिअअमम्मगूढसल्लघटणेहिं पुणो पुणो मं मन्दभाइणिं अज्जउत्तं अ सन्दावेसि (दारुणाऽसि सखि वासन्ति दारुणाऽसि । या एतैर्हृदयमर्मगूढशल्यघट्टनैः पुनः पुनर्मां मन्दभागिनीमार्यपुत्रं च सन्तापयसि) ।

रामः । चण्डि जानकि इतस्ततो दृश्यस्य इव न चानुकम्पसे ।

हा हा देवि स्फुटति हृदयं सीदते देह बन्धः
शून्यं मन्ये जगदविरतज्वालमन्तर्ज्वलामि ।
सीदन्धे तमसि विधुरो मज्जतीवान्तरात्मा
विष्वङ्मोहः स्थगयति कथं मन्दभाग्यः करोमि ३८

(इति मूर्च्छति)

सीता । हद्धी हद्धी पुणो वि पमूढो अज्जउत्तो (हा धिक् हा धिक् पुनरपि प्रमूढ आर्यपुत्रः) ।

वासन्ती । देव समाश्वसिहि समाश्वसिहि ।

सीता । हा अज्जउत्त मं मन्दभाइणिं उद्दिसिअ सअलजीअलोअमङ्गलाधारस्स दे वारंवारं संसइदजीविददारुणो दसापरिणामो हा हद्ध हि (हा आर्यपुत्र मां मन्द-

---

१ रोधसि

२ हिअअमम्मस्थगूढसल्लसरिसेहि पुणो पुणो मं मन्दभाइणिं अज्जउत्तं वि दुणावेसि (हृदयमर्मगूढशल्यसदृशैः पुनः पुनर्मां मन्दभागिनीमार्यपुत्रमपि दुनोषि ।

३ ध्वंसते

Digitized by Google

भागिनीमुद्दिश्य सकलजीवलोकमंगलाधारस्य ते वारं वारं संशयितजीवितदारुणो दशापरिणाम इति हा हतास्मि । (इति मूर्च्छति)

तमसा । वत्से समाश्वसिहि समाश्वसिहि पुनस्त्वत्पाणिस्पर्श एव संजीवनोपायो रामभद्रस्य ।

वासन्ती । कथमद्यापि नोच्छ्वसिति । हा प्रियसखि सीते क्वासि संभावयात्मनो जीवितेश्वरम् ।

सीता । (ससंभ्रममुपसृत्य हृदि ललाटे च स्पृशति)

वासन्ती । दिष्ट्या प्रत्यापन्नचेतनो रामभद्रः ।

रामः । आलिम्पन्नमृतमयैरिव प्रलेपै-
रन्तर्वा बहिरपि वा शरीरधातून् ।
संस्पर्शः पुनरपि जीवयन्नकस्मा-
दानन्दादपरविधं तनोति मोहम् ॥ ३९ ॥

(आनन्दनिमीलिताक्ष एव) सखि वासन्ति दिष्ट्या वर्धसे ।

वासन्ती । देव कथमिव ।

रामः । सखि किमन्यत् पुनः प्राप्ता जानकी ।

वासन्ती । अयि देव क्व सा ।

रामः । (स्पर्शसुखमभिनीय) पश्य नन्वियं पुरत एव ।

वासन्ती । अयि देव किमिति मर्मच्छेददारुणैरेभिः प्रलापैः प्रियसखीदुःखदग्धामपि पुनर्मन्दभागिनीं दहसि माम् ।

सीता । ओसरिदुं इच्छामि । एसो उण चिरसम्भावसोम्मसीअलेण अज्जउत्तप्फंसेण दीहदारुणं वि स-

---

१ जीवनोपाय. ।
२ प्रत्यापन्नजीवनो ।
३ दारुणैरतिप्रलापै. ।

Digitized by Google

न्दावं हरन्तेण वज्जलेवोवणिवद्धो विअ सिज्जन्तणीसह विपलहत्थो वेअणसीलो अवसो विअ मे हत्थो (अपसर्तुमिच्छामि । एष पुनश्चिरसङ्गावसौम्यशीतलेनार्यपुत्रस्पर्शेन दीर्घं दारुणमपि सन्तापं हरता वज्रलेपोपनिबद्ध इव स्विद्यद्भिः सह विपर्यस्तो वेपनशीलोऽवश इव मे हस्तः) ।

रामः । सखि कुतः प्रलापाः

गृहीतो यः पूर्वं परिणयविधौ कङ्कणधर-
श्चिरं स्वेच्छास्पर्शैरमृतशिशिरैर्यः परिचितः ।

सीता । अज्जउत्त सो एव दाणिं सि तुमं (आर्यपुत्र स एवेदानीमसि त्वम्) ।

रामः । स एवायं तस्यास्तुहिननिकरैपम्यसुभगो
मया लब्धः पाणिर्ललितलवलीकन्दलनिभः ॥४०॥
(इति गृह्णाति)

सीता । हद्धी हद्धी अज्जउत्तप्फंसमोहिदाए पमादो क्खु मे संवुत्तो (हा धिक् हा धिक् आर्यपुत्रस्पर्शमोहितायाः प्रमादः खलु मे संवृत्तः) ।

रामः । सखि वासन्ति आनन्दनिमीलितेन्द्रियः साध्वसेन परवानस्मि तत् त्वं तावदेनां धारय ।

वासन्ती । कष्टमुन्माद एव ।

सीता । (ससंभ्रममाक्षिप्यापसर्पति)

रामः । हा धिक् प्रमादो हा धिक् प्रमादः ।

---

१ दीहदारुणं वि सन्दाव झत्ति ओल्लवन्तेण वज्जलेवोवणद्धो विअ सिज्जन्तणीसहविवलहत्थो वेवदि अवसो विअ मे हत्थो (दीर्घदारुणमपि सन्तापं झटिति उल्लपता वज्रलेपोपनद्ध इव स्विद्यद्भिः सहविपर्यस्तो वेपतेऽवश इव मे हस्तः ।

२ तुहिन करकैपम्य ।

Digitized by Google

करपल्लवः स तस्याः सहसैव जडाज्जडः परिभ्रष्टः।
परिकम्पिणः प्रकम्पी करान्मम स्विद्यतः स्विद्यन्॥४१॥

सीता। हद्धी हद्धी अज्ज वि अणवत्थिदत्थिमिदमूढघूण्णत्तणअणो ण पज्जवत्थावेदि अत्ताणअं (हा धिक् हा धिक् अद्याप्यनवस्थितस्थिमितमूढघूर्णनयनो न पर्यवस्थापयत्यात्मानम्)।

तमसा। (सस्नेहहासकौतुकं निर्वर्ण्य)

सस्वेदरोमाञ्चितकम्पिताङ्गी
जाता प्रियस्पर्शसुखेन वत्सा।
मरुन्नवाम्भः प्रविधूतसिक्ता
कदम्बयष्टिः स्फुटकोरकेव॥ ४२॥

सीता। (स्वगतम्) अम्महे अवसेण एदेण अत्ताणएण लज्जाविद म्हि भअवदीए तमसाए। किं त्ति किल एसा मणिस्सदि एसो[3] परिच्चाओ एसो अहिसङ्गो त्ति (अम्महे अवशेनैतेनात्मना लज्जापिताऽस्मि भगवत्या तमसया। किमिति किलैषा मंस्यत एष परित्याग एषोऽभिषङ्ग इति)

रामः। (सर्वतोऽवलोक्य) हा कथं नास्त्येव। नन्वकरुणे वैदेहि।

सीता। सच्चं अकरुण म्हि जा एवंविधं तुमं पेक्खन्ती णं धरामि एव्व जीविदं (सत्यमकरुणाऽस्मि यैवंविधं त्वां प्रेक्षमाणा ननु धराम्येव जीवितम्)।

रामः कासि देवीं प्रसीद न मामेवंविधं परित्यक्तुमर्हसि।

---

१ जडात्मनः।
२ सस्नेहं निर्वर्ण्य।
३ एसो दे परिच्चाओ एसो अहिअभासङ्गो त्ति (एष ते परित्याग एष च हृदयासङ्ग इति)।
४ एवं तुमं पेक्खन्तीधरामि एव जीविदं (एवं त्वां प्रेक्ष्यमाणा धराम्येव जीवितं)

Digitized by Google

सीता । अइ अज्जउत्त विवरीदं विअ एदं (अयि आर्यपुत्र विपरीतमिवैतत्)।

वासन्ती । देव प्रसीद प्रसीद स्वेनैव लोकोत्तरेण धैर्येण संस्तम्भयातिभूमिगतविप्रलम्भमात्मानम् । कुतोऽत्र मे प्रियसखी ।

रामः । व्यक्तं नास्ति कथमन्यथा वासन्त्यपि तां न पश्येत् । अपि खलु स्वप्न एष स्यात् । न चास्मि सुप्तः । अथवा कुतो रामस्य स्वप्नः । सर्वथा स एव भगवाननेकवारपरिकल्पना निर्मितो विप्रलम्भः पुनःपुनरनुबध्नाति माम्

सीता । मए एव दारुणाए विप्पलद्धो अज्जउत्तो (मयैव दारुणया निप्रलब्ध आर्यपुत्रः)।

वासन्ती । देव पश्य पश्य

पौलस्त्यस्य जटायुषा विघटितः कार्ष्णायसोऽयं रथः
पश्यैते पुरतः पिशाचवदनाः कङ्कालशेषाः खराः ।
स्वच्छिन्नजटायुपक्षतिरितः सीतां ज्वलन्तीं वह-
न्तर्व्याकुलविद्युदम्बुद इव द्यामभ्युदस्थादरिः ॥४३॥

सीता । (सभयम्) अजउत्त तादो वावादिआदि अहं अ अवहरीआमि । परित्ताहि परित्ताहि । (आर्यपुत्र तातो व्यापाद्यतेऽहंचापहिये । परित्रायस्व परित्रायस्व) ।

रामः । (सवेगमुत्थाय) आः पाप तातप्राणसीताप-हारिन् क्व यासि ।

वासन्ती । अयि देव राक्षसकुलप्रलयधूमकेतो अद्यापि ते मन्युविषयः ।

---

१ कुतो च प्रियसखी सीता ।
२ कुतो वा रामस्य निद्रा । स-वथा स एवैव भगवाननेकवार-परिकल्पितनिर्माता विप्रलम्भः

Digitized by Google

सीता। अम्मो उम्मत्तिअ म्हि संवुत्ता (अहो उन्मत्ताऽस्मि संवृत्ता)।

रामः। अन्वर्थ एवायमधुना प्रलापो वर्तते।

उपायानां भावादविरतविनोदव्यतिकरै-
र्विमर्दैर्वीराणां जगति जनितात्यद्भुतरसः।
वियोगो मुग्धाक्ष्याः स खलु रिपुघातावधिरभूत्
कथं तूष्णीं सह्यो निरवधिरिदानीं तु विरहः॥४४॥

सीता। णिरवधि त्ति हा हद म्हि मन्दभाइणी (निरवधिरिति हा हतास्मि मन्दभागिनी)।

(इति रोदिति)

रामः। हा कष्टम्

व्यर्थं यत्र कपीन्द्रसख्यमपि मे वीर्यं हरीणां वृथा
प्रज्ञा जाम्बवतोऽपि यत्र न गतिः पुत्रस्य वायोरपि।
मार्गे यत्र न विश्वकर्मतनयः कर्तुं नलोऽपि क्षमः
सौमित्रेरपि पत्रिणामविषये तत्र प्रिये क्वासि मे॥४५॥

सीता। बहु मणाविद म्हि तं पुव्वविरहं (बहु मानिताऽस्मि तं पूर्वविरहम्)।

रामः। सखि वासन्ति दुःखायैवेदानीं रामस्य दर्शनं सुहृदां कियच्चिरं त्वां रोदयिष्यामि तदनुजानीहि मां गमनाय।

सीता। (सोद्वेगमोहं तमसामवलम्ब्य) भअवदि तमसे कहं गच्छादि एव अज्जउत्तो (भगवति तमसे कथं गच्छत्येवार्यपुत्रः)।

तमसा। वत्से समाश्वसिहि समाश्वसिहि। नन्वावाम-

---

१ व्यतिकरो।
२ निरवधिरयं स्वप्नतिथिः।
३ अविषयस्तत्राभिवे क्वासि भोः।

Digitized by Google

प्यायुष्मतोः कुशलवयोर्वर्षवर्धनमङ्गलानि[1] सम्पादयितुं भागीरथीपदान्तिकमेव गच्छावः ।

सीता । भअवदी पसीद खणमेत्तं वि दाव दुल्लहं जणं पेक्खामि (भगवति प्रसीद क्षणमात्रमपि तावद् दुर्लभं जनं प्रेक्षे) ।

रामः । अस्ति चेदानीमश्वमेधाय सहधर्मचारिणी मे ।

सीता । (सोत्कम्पम्) अज्जउत्त[2] कीसा[3] (आर्यपुत्र किं सा) ।

रामः । हिरण्मयी सीतायाः प्रतिकृतिः ।

सीता । (सोच्छ्वासं सास्रम्) अज्जउत्तो दाणिं सि तुमं । अम्महे उक्खाणिदं मे दाणिं परिच्चाअलज्जाजणं अज्जउत्तेण (आर्यपुत्र इदानीमसि त्वम् । अम्महे उत्खातं मे इदानीं परित्यागलज्जाजनमार्यपुत्रेण) ।

रामः । तत्रापि तावद्बाष्पदिग्धं चक्षुर्विनोदयामि ।

सीता । धण्णा सा जा अज्जउत्तेण बहु मण्णाअदे जा अ अज्जउत्तं विणोदअन्ती आसाणिबन्धणं जादा जीअलोअस्स (धन्या सा यार्यपुत्रेण बहु मन्यते या चार्यपुत्रं विनोदयन्त्याश्वासनिबन्धनं जाता जीवलोकस्य) ।

तमसा । (सस्मितं स्नेहात्तं परिष्वज्य) अयि वत्से एवमात्मा स्तूयते ।

सीता । (सलज्जमधोमुखी स्वगतम्) परिहसिद म्हि भअवदीए तमसाए (परिहसितास्मि भगवत्या तमसया) ।

वासन्ती । महानयं व्यतिकरोऽस्माकं प्रसादः । गमनं पुनर्यथा कार्यहानिर्न भवति तथास्ताम् ।

---

१ वर्षग्रन्थिमङ्गलं ।
२ (साक्षेपं स्वगतम्)
३ का ।

Digitized by Google

सीता । पडिउल्ला दाणिं मे वासन्ती संवुत्ता (प्रतिकूलेदानीं मे वासन्ती संवृत्ता) ।

तमसा । एहि वत्से गच्छावः ।

सीता । (सकष्टम्) एवं करेम (एवं कुर्वः) ।

तमसा । कथं वा गम्यते यस्यास्तव

प्रत्युप्तस्येव दयिते तृष्णादीर्घस्य चक्षुषः ।
मर्मच्छेदपरैर्यत्नैराकर्षो न समाप्यते ॥ ४६ ॥

सीता । णमो[1] णमो अपुव्वपुण्णजणिददंसणाणं अज्जउत्तचरणकमलाणं (नमो नमोऽपूर्वपुण्यजनितदर्शनेभ्य आर्यपुत्रचरणकमलेभ्यः) । (इति मूर्च्छति)

तमसा । वत्से समाश्वसिहि समाश्वसिहि ।

सीता । (समाश्वस्य) किमचिरं वा मेघान्तरेण पुण्णिमचन्दस्स दंसणम् (किमचिरं वा मेघान्तरेण पूर्णिमचन्द्रस्य दर्शनम्) ।

तमसा । अहो संविधानकम्

एको रसः करुण एव निमित्तभेदा-
द्भिन्नः पृथक् पृथगिवाश्रयते विवर्तान् ।
आवर्तबुद्बुदतरङ्गमयान् विकारा-
नम्भो यथा सलिलमेव तु तत्समग्रम् ॥ ४७ ॥

रामः । अयि विमानराज इत इतः (इति सर्वे उत्तिष्ठन्ति) ।

तमसावासन्त्यौ । (सीतारामौ प्रति) ।

अवनिरमरसिन्धुः सार्धमस्मद्विधाभिः
स च कुलपतिराद्यश्छन्दसां यः प्रयोक्ता ।

---

1 णमो णमो अकिदपुण्णजणादंसणीआणं अज्जउत्तचरणकमलाणं (नमो नमोऽकृतपुण्यजनादर्शनीयेभ्य आर्यपुत्रचरणकमलेभ्यः) ।

स च मुनिरनुयातारुन्धतीको वसिष्ठ-
स्त्वायि वितरतु भद्रं भूयसे मङ्गलाय ॥ ४८ ॥

(इति निष्क्रान्ताः सर्वे)

छाया नाम
तृतीयोऽङ्कः ।

(ततः प्रविशतस्तापसौ)

एकः । सौधातके दृश्यतामयं भूयिष्ठसन्निधापितातिथिजनस्य समधिकारम्भरमणीयतां भगवतो वाल्मीकेराश्रमपदस्य । तथाहि

नीवारौदनपिण्डमुष्णमधुरं सद्यः प्रसूताभिधा-
पीतादभ्यधिकं तपोवनमृगैः पर्याप्तमाचामति ।
गन्धेन स्फुरता मनागनुसृतो भक्तस्य सर्पिष्मतः
कर्कन्धूफलमिश्रशाकपचनाम्नोदः परिस्तीर्यते ॥१॥

सौधातकिः । आअदं अज्जआअकारणं सविसेसभूदं अज्ज जिण्णकुच्चाणं (आगतमनध्यायकारणं सविशेषभूतमद्य जीर्णकूर्चानाम्) ।

प्रथमः । (विहस्य) अपूर्वः कोऽपितेवद्रुमानहेतुर्मुरुषु सौधातके ।

सौधातकिः । भो भाण्डाअण किंणामहेओ एसो महन्तस्स त्थविरसत्थस्स धुरन्धरो[1] अज्ज चीरधारओ अदिहि आअदो (भो भाण्डायन किन्नामधेय एष महतः स्थविरसार्थस्य धुरन्धरोऽद्य चीरधारकोऽतिथिरागतः

---

१ धुरंधरो अज्ज अदिहि आअदो (धुरन्धरोऽद्यातिथिरागतः)

Digitized by Google

भाण्डायनः । धिक् महसनम् अन्वयमृष्यकुलभमादृ-न्धतीपुरस्कृतान् महाराजदशरथस्य दारानधिष्ठाय भगवान् वसिष्ठःप्राप्तस्तत् किमेवं मलपति ।

सौधातकिः । हुं वसिट्ठो (हुं वसिष्ठः) ।

भाण्डायनः। अथ किम् ।

सौधातकिः । मए उण जाणिदं वग्घो वा विओ वा एसो त्ति (मया पुनर्ज्ञातं व्याघ्रो वा वृको वैष इति) ।

भाण्डायनः । आः किमुक्तं भवति ।

सौधातकिः । तेन परावडिदेण एव सा वराइआ कल्लो-णिआ मडमडाइदा (तेन परापतितेनैव सा वराकी कल्याणी मडमडायिता) ।

भाण्डायनः । समांसो मधुपर्क इत्याम्नायं बहुमन्यमा-नाः श्रोत्रियायाभ्यागताय वत्सतरीं महोक्षं वा महाजं वा निर्वपन्ति गृहमेधिन इति हि धर्मसूत्रकाराः समामनन्ति ।

सौधातकिः । भो गिहिदोसि (भो गृहितोऽसि) ।

भाण्डायन । कथमिव ।

सौधातकिः । जेण आअदेसु वसिट्ठमिस्सेसु वच्छदरी विसासिदा । अज्ज एव पच्चागदस्स रण्णिसिणो जणअस्स भअवदा वम्मीएण दहिमहुहिं एव णिव्वत्तिदो महुवक्को । वच्छदरी उण विसज्जिदा (येनागतेषु वसिष्ठमिश्रेषु वत्सतरी विशासिता । अद्यैव पर्यागतस्य राजर्षेर्जनकस्य भगवता वाल्मी-किना दधिमधुभिरेव निर्वर्तितो मधुपर्को वत्सतरी पुनर्विसर्जिता) ।

भाण्डायनः । अनिहतमांसानामेवंकल्पमृषयो मन्यन्ते निहतमांसस्तु तत्रभवान् जनकः ।

---

१ कल्लोदिआ ।
२ तं हि धर्मसूत्रकाराः ।
३ गिगिहिदो सि (गृहीतोऽसि) ।
४ पच्चागदस्स (प्रत्यागतस्य) ।

Digitized by Google

सौधातकिः । किं निमित्तं (किं निमित्तम्) ।

भाण्डायनः । स तदैव देव्या सीमन्तोन्नयनादिकं दैवदुर्विपाकमुपश्रुत्य वैखानसः संवृत्तस्तस्यास्य कतिपये संवत्सराश्चन्द्रद्वीपतपोवने तपस्तप्यमानस्य ।

सौधातकिः । तदो किं त्ति आअदो (ततः किमित्यागतः)

भाण्डायनः । चिरन्तनप्रियसुहृदं प्राचेतसं द्रष्टुम् ।

सौधातकिः । अवे अज्ज सम्बन्धिणीहिं समं संवुत्तं सेु दंसणं ण व त्ति (अप्यद्य सम्बन्धिनीभिः समं संवृत्तमस्य दर्शनं न वेति) ।

भाण्डायनः । सम्प्रत्येव भगवता वसिष्ठेन देव्याः कौशल्यायाः सकाशं भगवत्यरुन्धती प्रहिता यत् स्वयमुपेत्य वैदेहो द्रष्टव्य इति ।

सौधातकिः । जहा एदे त्थविरा परप्परं मिलिदा तहा अम्हे वि बहुएहिं समं मिलिअ अणज्झायमहूसवं खेलन्ता सम्भावेम (यथैते स्थविराः परस्परं मिलितास्तथावामपि बहुभिः समं मिलित्वानध्यायमहोत्सवं खेलन्तौ संभावयावः) ।

(इति परिक्रामतः)

भाण्डायनः । तदयं ब्रह्मवादी पुराणराजर्षिर्जनकः प्राचेतसवसिष्ठावुपोत्थ सम्प्रत्याश्रमबहिर्वृक्षमूलमधिशेते । य एषः

हृदि नित्यानुषक्तेन सीताशोकेन तप्यते ।
अन्तःप्रसृप्तदहनो ज्वलन्निव वनस्पतिः ॥ २ ॥

(निष्क्रान्तौ)

। विष्कम्भकः ।

---

१ द्रष्टव्य इति वक्तुम् ।
२ एदे सव्वे जेठरा (एते सर्वे ज्येष्ठाः) ।
३ उपगम्य ।
४ अन्तः प्रसुप्तदहनो ।
अन्तः प्रदीप्तदहनो ।

(ततःप्रविशति जनकः)

जनकः । अपत्ये यत्तादृग्दुरितमभवत्तेन महता
विषक्तस्तीव्रेण व्रणितहृदयेन व्यथयता ।
पटुर्धारावाही नव इव चिरेणापि हि न मे
निकृन्तन् मर्माणि ककच इव मन्युर्विरमति ॥ ३ ॥

कष्टमेवं नामजरसा दुःखेन च दुरासदेन भूयः परिकर्मान्तपनप्रभृतिभिस्तपोभिरात्तरसधातुरनुपयुज्यमानो नाद्यापि मे दग्धदेहः पतति । अन्धतामिस्रा असूर्या नाम ते लोकास्तेभ्यः प्रतिविधीयन्ते य आत्मघातिन इत्येवमृषयो मन्यन्ते । अनेकसंवत्सरातिक्रमेऽपि च प्रतिक्षणपरिभावनया स्पष्टनिर्भासः प्रत्यग्र इव दारुणो न मे दुःखसंवेगः प्रशाम्यति । अयि मातर्देवयजनसम्भवे सीते ईदृशस्ते निर्भागभागः परिणतो येन लज्जया स्वच्छन्दमाक्रन्दितुमपि न शक्यते । हा हा पुत्रि

अनियतरुदितस्मितं विराजत्-
कतिपयकोमलदन्तकुड्मलाग्रम् ।
वदनकमलकं शिशोः स्मरामि
स्खलदसमञ्जसमुच्चजल्पितं ते ॥ ४ ॥

भगवति वसुन्धरे सत्यमतिदृढासि

त्वं वर्ष्मुनयो वसिष्ठगृहिणी गङ्गा च यस्या विदु-
र्माहात्म्यं यदि वा रघोः कुलगुरुर्देवः स्वयं भास्करः ।
विद्यां वागिव यामसूत भवती शुद्धिं गतायाः पुर-
स्तस्यास्त्वं दुहितुस्तथा विशसनं किं दारुणेऽमृष्यथाः ॥ ५ ॥

(नेपथ्ये) इत इतो भगवतीमहादेव्यौ ।

---

१ मञ्जु जल्पितं ते । २ भवती तद्वत्सु या दैवतं ।

Digitized by Google

जनकः । (दृष्ट्वा) अये गृष्टिनोपदिश्यमानमार्गा भगवत्यरुन्धती । (उत्थाय) कां पुनर्महादेवीत्याह । (निरूप्य) हा कथं महाराजदशरथस्य धर्मदाराः प्रियसखी मे कौशल्या । क एतत् प्रत्येति सैवेयमिति ।

आसीदियं दशरथस्य गृहे यथा श्रीः
श्रीरेव वा किमुपमानपदेन सैषा ।
कष्टं वतान्यादृश एव दैववशेन जाता
दुःखात्मकं किमपि भूतमहो विपाकः ॥ ६ ॥

अयमपरः पापो[1] दशाविपर्यासः

य एव मे जनः पूर्वमासीन्मूर्तो महोत्सवः ।
क्षते क्षारमिवासह्यं जातं तस्यैव दर्शनम् ॥ ७ ॥

(ततः प्रविश्यारुन्धती कौशल्या कञ्चुकी च)

अरुन्धती । ननु ब्रवीमि[3] द्रष्टव्यः स्वयमुपेत्य वैदेह इत्येष वः कुलगुरोरादेशः । अतएवाहं प्रेषिता । तत् कोऽयं पदे पदे महान्[4]ननध्यवसायः ।

कञ्चुकी । देवि संस्तम्भयात्मानम्[5] अनुरुध्यस्व भगवतो वसिष्ठस्यादेशमिति विज्ञापयामि ।

कौशल्या । एरिसे काले मिहिलाधिवो दट्ठवो त्ति सअं एव सव्वाइं दुक्खाइं समुब्भवन्ति । ण सक्कणोमि उव्वेहमाणं मूलबन्धणं हिअअं अवत्थाविदुं (ईदृशे काले मिथिलाधिपो द्रष्टव्य इति सममेव सर्वाणि दुःखानि समुद्भवन्ति । न शक्नोम्युद्वहमानमूलबन्धनं हृदयमवस्थापयितुम्) ।

अरुन्धती । अत्र कः सन्देहः

---

१ क एवं ।
२ अयमपरःप्रायः ।
३ ननु भवतीभिः ।
४ महानध्यवसायः ।
५ उव्वत्तमाणमूलबन्धनं ।

Digitized by Google

सन्तानवाहीन्यपि मानुषाणां दुःखानि सद्बन्धुवियोगजानि।
दृष्टे जने मेयसि दुःसहानि स्रोतःसहस्रैरिव संप्लवन्ते ॥ ८ ॥

कौशल्या। कहं वच्छाए वहूए एव गदे तस्स राएसिणो मुहं दंसेम्ह (कथं वत्साया वध्वा एवं गते तस्य राजर्षेर्मुखं दर्शयामः)।

अरुन्धती। एष वः श्लाघ्यसम्बन्धी जनकानां कुलोद्वहः।
याज्ञवल्क्यो मुनिर्यस्मै ब्रह्मपारायणं जगौ ॥ ९ ॥

कौशल्या। एसो सो महाराअस्स हिअआणन्दो वच्छाए वहूए पिदा राएसी। हद्धी हद्धी सम्भाविदम्हि अणुवट्ठिदमहूसवे दिअहे। हा देव्व सव्वं एव तं णत्थि (एष स महाराजस्य हृदयानन्दो वत्साया वध्वाः पिता राजर्षिः। हा धिक् हा धिक् सम्भाविताऽस्म्यनुपस्थितमहोत्सवे दिवसे। हा दैव सर्वमेव तच्चास्ति)।

जनकः। (उपसृत्य) भगवन्नरुन्धती वैदेहः सीरध्वजोऽभिवादयते।

यया पुंतन्यो निधिरपि पवित्रस्य महसः
पतिस्ते पूर्वेषामपि खलु गुरूणां गुरुतमः।
त्रिलोकीमङ्गल्यामवनितललोलेन शिरसा
जगद्वन्द्यां देवीमुषसमिव वन्दे भगवतीम् ॥ १० ॥

अरुन्धती। परं ज्योतिस्ते प्रकाशताम्। अयं त्वां पुनातु देवः परोरजा य एष तपति।

जनकः। आर्ये गृष्टे अपि कुशलमस्याः प्रजापालस्य मातुः।

कञ्चुकी। निर्वृत्तशेषमतिनिष्ठुरमुपालब्धाः स्मः। रा-

---

१ अनुट्ठिदमहूसवे (अनुष्ठितमहोत्सवे)।
२ त्रिलोकीमाङ्गल्यामवनितल
लीलेन।
३ निर्वृत्तशेषम्।

Digitized by Google

नर्षे अमर्षेण मन्युना चिरपरिरक्षकरामभद्रमुखचन्द्रदर्शनां नार्हसि त्वं दुःखयितुमतिदुःखिताम् देवीम् । रामभद्रस्यापि[1] दैवदुर्योगः कोऽपि । यत् किल समन्तात्प्रवृत्तवीभत्सकिंवदन्तीकाः पौरजानपदा नाग्निपरिशुद्धिमल्पकाः प्रतिपद्यन्त इयतो दारुणमनुष्ठितम् ।

जनकः । आः कोऽयमग्निर्नामास्मत्प्रसूतिपरिशोधने । कष्टमेवंवादिना जनेन रामपरिभूता अपि वयं पुनः परिभूयामहे ।

अरुन्धती । एवमेतत् । अग्निरिति वत्सांप्रति परिलघून्यक्षराणि । सीतेत्येव पर्य्याप्तम् । हा वत्से

शिशुर्वा शिष्या वा यदसि मम तत्तिष्ठतु तथा
विशुद्धेरुत्कर्षस्त्वयि तु मम भक्तिं द्रढयति[2]
शिशुत्वं क्षीणं वा भवतु ननु वन्द्यासि जगतो[3]
गुणाः पुञ्जस्थानं गुणिषु न च लिङ्गं न च वयः ॥ ११

कौशल्या । अम्मो उम्मीलन्ति वेअणाओ (अम्मो उन्मीलन्ति वेदनाः) । (इति मूर्च्छति)

जनकः । हा कष्टं किमेतत् ।

अरुन्धती । राजर्षे किमन्यत्

स राजा तत् सौख्यं स च शिशुजनस्ते च दिवसाः
स्मृतावाविर्भूतं त्वयि सुहृदि दृष्टे तदखिलम् ।
विपाके घोरेऽस्मिन् ननु खलु विमूढा तव सखी
पुरन्ध्रीणां चेतः कुसुममसुकुमारं हि भवति ॥ १२ ॥

---

१ रामभद्रेणापि समन्तात्प्रवर्तितवीभत्सकिंवदन्तीकाः पौरजानपदा नाग्निशुद्धिमल्पका प्रतियान्ति ।

२ जनयति ।

३ जगताम् ।

४ अथ ।

५ चित्तम् ।

Digitized by Google

जनकः। हन्त हन्त सर्वथा नृशंसोऽस्मि संवृत्तः। यदियमस्य दृष्टान् प्रियसुहृदः प्रियान्[1] दारान् न स्निग्धं पश्यामि।

स सम्बधी श्लाघ्यः प्रियसुहृदसौ तच्च हृदयं
स चानन्दः साक्षादपिच निखिलं जीवितफलम्[2]।
शरीरं जीवो वा यदधिकमतो वा प्रियतमो
महाराजः श्रीमान् किमिव मम नासीदशरथः॥१३॥

कष्टमियमेव सा कौशल्या

यदस्याः पत्युर्वा रहसि परमं दूषितमभू-
दभूवं दम्पत्योः पृथगहमुपालम्भविषयः।
प्रसादे कोपे वा तदनु मदधीनो विधिरभू-
दलं वा तत् स्मृत्वा दहति यदवस्कन्द्य हृदयम्[4] १४

अरुन्धती। हा कष्टं चिरेणनिरुद्धनिश्वासनिष्ठुरं हृदयमस्याः।

जनकः। हा प्रियसखि। (इति कमण्डलुजलेन सिञ्चति)

कञ्चुकी।

सुहृदिव प्रकटय्य सुखप्रदः[6] प्रथममेकरसामनुकूलताम्।
पुनरकाण्डविवर्त्तनदारुणो विधिरहोविशिनष्टिमनोरुजम्[7] १५

कौशल्या। (संज्ञां लब्ध्वा) हा वच्छे जाणइ कहिं सि। सुमरामि दे विआहलच्छीपरिग्गहेकमण्डणं पप्फुरन्तमुद्धविहसिदं मुद्धमुहपुण्डरीअं। आप्फुरन्तचन्दचन्दिआसुन्दरेहिं अङ्गेहिं पुणो वि मे जादे उज्जोएहि-

---

१ कष्टं कष्टं सर्वथा नृशंसोऽस्मि
२ प्रियदारान्।
३ जीवितपदम्।
४ प्रियतरो।
५ अतिचिरादवरुद्ध।
६ सुखप्रदाम्।
७ प्रविशिनष्टि विधिर्मनसो रुजम्।
८ मङ्गलम्।
९ आफुरन्तकौमुदीचन्दचान्द-आसुन्दरोहिं (आस्फुरत्कौमुदीचन्द्रचन्द्रिकासुन्दरैः।

उच्छङ्गं । सव्वदा महाराओ भणादि एसा रहुउलमहत्तराणं वहू अम्हाणं उण जणअसम्बन्धेण दुहिदिआ एव (हा वत्से जानकि कुत्रासि । स्मरामि ते विवाहलक्ष्मीपरिग्रहैकमण्डनं प्रस्फुरच्छुद्धविहसितं मुग्धमुखपुण्डरीकम् । आस्फुरच्चन्द्रचन्द्रिकासुन्दरैरङ्गैः पुनरपि मे जाते उद्योतयोत्सङ्गं । सर्वदा महाराजो भणत्येषा रघुकुलमहत्तराणां वधूरस्माकं पुनर्जनकसम्बन्धेन दुहितैव) ।

कञ्चुकी । यथाह देवि ।

पञ्चमसूतेरपि राज्ञ आसीत् प्रियो विशेषेण सुबाहुशत्रुः ।
वधूचतुष्केऽपि[1] यथैवशान्ता प्रियातननुजास्य[2] तथैवसीता १६

जनकः । हा प्रियसख महाराज दशरथ एवमसि सर्वप्रकारहृदयङ्गमः । कथं विस्मर्यसे ।

कन्यायाः किल पूजयन्ति पितरो जामातुरात्मं जनं
सम्बन्धे विपरीतमेव तदभूदाराधनं ते मयि ।
त्वं कालेन तथाविधोऽस्यपहृतः सम्बन्धबीजंच तद्-
घोरेऽस्मिन् मम जीवलोकनरके पापस्य धिग्जीवितम् ॥ १७ ॥

कौशल्या । जादे जाणइ किं करेमि दृढवज्जलेवघडिअवन्धणिच्चलं हदजीविदं मं मन्दभाइणिं ण परिच्चअइ- (जाते जानकि किं करोमि दृढवज्रलेपघटितबन्धनिश्चलं हतजीवितं मां मन्दभागिनीं न परित्यजति) ।

अरुन्धती । आश्वसिहि राजपुत्रि बाष्पविश्रामोऽप्यैन्तरे कर्तव्य एव । अन्यच्च किं न स्मरसि यदवोचद्भगवान् शृङ्गाश्रमे युष्माकं कुलगुरुस्तदुपजातमेव । किन्तु कल्याणोदर्कं भविष्यति ।

---

१ यथा हि ।
२ त्वमूदस्य ।
३ तथा विधोऽपि ।
४ तु ।
५ अन्तराल ।

Digitized by Google

कौशल्या। भअवदि अदिक्कन्तो मणोरहो (भगवति अतिक्रान्तो मनोरथः)।

अरुन्धती। तत् किं मन्यसे राजपुत्रि मृषोद्यं तदिति। न हीदं सुक्षत्रियेऽन्यथा मन्तव्यं भवितव्यमेव तेन।

आविर्भूतज्योतिषां ब्राह्मणानां
ये व्याहारास्तेषु मा संशयो भूत्।
भद्रा ह्येषां वाचि लक्ष्मीर्निषक्ता
नैते वाचं विप्लुतां व्याहरन्ति ॥ १८ ॥

(नेपथ्ये कलकलः)

(सर्वे आकर्णयन्ति)

जनकः। अद्य खलु शिष्टानध्याय इति उद्धतं खेलतां बटूनां कलकलः।

कौशल्या। सुलहसोक्खं दाव बालत्तणं होदि। (निरूप्य) अम्महे एदाणं मज्झे को एसो रामभद्दलच्छीपरिसोहिदेहिं सावट्ठम्भमुद्धललिदेहिं अङ्गेहिं अम्हाणं लोअणाइं सीदलावेदि (सुलभसौख्यं तावद् बालत्वं भवति। अम्महे एतेषां मध्ये क एष रामभद्रलक्ष्मीपरिशोभितैः सावष्टम्भमुग्धललितैरङ्गैरस्माकं लोचनानि शीतलयति)।

अरुन्धती(अपवार्य सहर्षबाष्पम्) इदं नाम तद्भागीरथीनिवेदितरहस्यं कर्णामृतम्। न त्वेवं विद्मः कतरोऽयमायुष्मतोः कुशलवयोरिति।

जनकः। कुवलयदललिग्धश्यामः शिखण्डकमण्डनो
बटुपरिषदं पुण्यश्रीकः श्रियैव सभाजयन्।

---

१ लच्छीसरिसेहि (लक्ष्मीसदृशैः)।
२ श्यामस्निग्धः।
३ श्रियैव।

पुनरिव शिशुर्भूतो[1] वत्सः स मे रघुनंदनो
झटिति कुरुते दृष्टः कोऽयं दृशोरमृताञ्जनम् ॥१९॥

कञ्चुकी । क्षत्रियब्रह्मचारी दारकोऽयमिति मन्ये ।

जनकः । एवमेतत् । तथाहि

चूडाचुम्बितकङ्कपत्रमभितस्तूणीद्वयं पृष्ठतो
भस्मस्तोकपवित्रलाञ्छनमुरो[2] धत्ते त्वचं रौरवीम् ।
मौर्व्या मेखलया नियन्त्रितमधोवासश्च माञ्जिष्ठकं
पाणौ कार्मुकमक्षसूत्रवलयं दण्डोऽपरः[3] पैप्पलः[4] ॥२०॥

भगवत्यरुन्धति किमु त्वमेक्षसे कुतस्त्योऽयमिति ।

अरुन्धती । अद्यैवागता वयम् ।

जनकः । आर्य गृष्टे अतीव मे कौतुकं वर्तते तद्भगवन्तं वाल्मीकिमेव गत्वा पृच्छ । इमं च बालकं ब्रूहि केऽप्येते प्रवयसस्त्वां दिदृक्षव इति ॥

कञ्चुकी । यथाज्ञापयसि ।

(इति निष्क्रान्तः)

कौशल्या । किं भणध एवं भणिदो आगमिस्सदित्ति (किं भणथैवं भणित आगमिष्यतीति) ।

अरुन्धती । भिद्येत वा सद्वृत्तमीदृशस्य निर्माणस्य ।

कौशल्या । (निरूप्य) कहं सविणअं णिसामिदगिट्ठिवअणो विसञ्जिदइसिदारओ इदोऽहिमुहं पसारिदो एवसो वच्छो (कथं सविनयं निशामितगृष्टिवचनो विसृष्टर्षिदारक इतोऽभिमुखं प्रसृत एव स वत्सः) ।

जनकः । (चिरं निर्वर्ण्य) भोः किमप्येतत्

---

१ शिशुर्भूत्वा ।
२ भस्मस्तोमपावित्र्य ।
३ दण्डं तथा पैप्पलम् ।
४ भिद्येत किम् ।

Digitized by Google

महिम्नामेतस्मिन् विनयशिशुता मौग्ध्यमसृणो
विदग्धैर्निर्ग्राह्यो न पुनरविदग्धैरतिशयः।
मनो मे सम्मोदः स्थिरमपि हरत्येव बलवा-
नयोधातुं यद्वत् परिलघुरयस्कान्तशकलः ॥२१॥

(प्रविश्य)

लवः। अज्ञातनामकमाभिजनान् पूज्यानपि[2] नः स्वतः कथमभिवादयिष्ये। (विचिन्त्य) अयं पुनरविरुद्धः प्रकार इति वृद्धेभ्यः श्रूयते। (सविनयमुपसृत्य) एष वो लवस्य मूर्धा प्रणामपर्यायः।

अरुन्धतीजनकौ। कल्याणिन्नायुष्मान् भूयाः।

कौशल्या। जाद चिरं जीव (जात जीरं जीव)।

अरुन्धती। एहि वत्स (लवमुत्सङ्गे कृत्वाऽपवार्य) दिष्ट्या न केवलमुत्सङ्गश्चिरान्मनोरथोऽहि मे संपूर्णः।

कौशल्या। जाद इदो वि दाव एहि। (क्रोडे कृत्वा) अम्महे ण केअलं दरविअसन्तणीलुप्पलदामसामलुज्जलेण[3] देहबन्धेण कवलिदारविन्दकेसरकसाअकण्ठकलहंसणिणाददीहरदीहरेण सरेण अ रामभद्दस्स अणुहरदि। पं कठोरकमलगब्भपम्मलो सरीरफंसो वि तारिसो एव वच्छस्स। जीव जाद पेक्खामि दाव दे मुहचन्दं। (चिबुकमुन्नमय्य निरूप्य च सबाष्पाकूतम्) राएसिकिं ण पेक्खासि णिउणं णिरुविज्जमाणं से मुहं वच्छाए बहूए मुहचन्देण संवददि एव (जात इतोपि तावदेहि। अम्महे न केवलं दरविकसन्नीलोत्पलदामश्यामलोज्वलेन देहब-

---

१ संमोहः स्थिरमपि हरत्येष बलवान्।

२ पूज्यानपि सतः कथमभिवादयिष्ये।

३ णीलुप्पलसामलुण्णदेण (नीलोत्पलश्यामलोन्नतेन)।

Digitized by Google

न्धेन कवलितारविन्दकेसरकषायकण्ठकलहं सनिनाददीर्घदीर्घेण[1] स्वरेण च रामभद्रमनुहरति । ननु कठोरकमलगर्भकोमलः शरीरस्पर्शोपि तादृश एव वत्सस्य । जीव जात प्रेक्षे तावत्ते मुखचन्द्रम् । राजर्षे किं न प्रेक्षसे निपुणं निरूप्यमाणमस्य मुखं वत्साया वध्वा मुखचन्द्रेण संवदन्येव) ।

जनकः । पश्यामि सखि पश्यामि ।

कौशल्या । अम्मो उम्मत्तीभूदं विअ मे हिअअं किंवि चिन्तअन्तो बहु विप्पलवदि[2] (अम्मो उन्मत्तीभूतमिव मे हृदयं किमपि चिन्तयद्बहु विप्रलपति) ।

जनकः । (निरूप्य)

वत्सायाश्च रघूद्वहस्य च शिशावस्मिन्नभिव्यज्यते
संपूर्णप्रतिबिम्बतेव[3] निखिला सैवाकृतिः सा द्युतिः ।
सा वाणी विनयः स एव सहजः पुण्यानुभावोऽप्यसौ
हा हा दैव किमुत्पथैर्मम मनः पारिप्लवं धावति ॥२२॥

कौशल्या । जाद अत्थि दे मादा सुमरासि वा तादं (जात अस्ति ते माता स्मरसि वा तातम्) ।

लवः । नहि नहि ।

कौशल्या । तदो कस्स तुमं (ततः कस्य त्वम्) ।

लवः । भगवतो वाल्मीकेः ।

कौशल्या । अइ जाद कहिदव्वं कहेहि (अयि जात कथयितव्यं कथय) ।

---

१ कलहंसणिग्घोसघग्घराणिणा-ददीहरदीहरेण सरेण अ रामभद्दमणुसरादि (कलहंसनिर्घोषघर्घरनिनाददीर्घदीर्घेण स्वरेण च रामभद्रमनुसराति)।

२ किं वि एदस्स मुहं विप्पलहादि (किमप्येतस्यमुखं विप्रलभते) ।

३ संपूर्ण प्रतिबिम्बतैव ।

Digitized by Google

लवः। एतदेव जानामि।

(नेपथ्ये)

भो भोः सैनिका एष खलु कुमारश्चन्द्रकेतुराज्ञापयति न केनचिदाश्रमाभ्यर्णभूमिराक्रामितव्येति।

अरुन्धतीजनकौ। अये मेध्याश्वरक्षाप्रसङ्गादुपागतो वत्सश्चन्द्रकेतुरद्य द्रष्टव्य इत्यहो सुदिवसः।

कौशल्या। वच्छलक्खणस्स पुत्तओ आणवेदि त्ति अमिअविन्दुसुन्दराइ अक्खराइ सुणीअन्ति (वत्सलक्ष्मणस्य पुत्रक आज्ञापयतीत्यमृतबिन्दुसुन्दराण्यक्षराणि श्रूयन्ते)।

लवः। आर्य क एष चन्द्रकेतुर्नाम।

जनकः। जानासि रामलक्ष्मणौ दाशरथी।

लवः। एतावेव रामायणकथापुरुषौ।

जनकः[1]! तत् कथं न जानासि तस्य लक्ष्मणस्यायमात्मजश्चन्द्रकेतुः।

लवः। ऊर्मिलापुत्रस्तर्हि मैथिलस्य राजर्षेर्दौहित्रः।

अरुन्धती (विहस्य) आविष्कृतं कथाप्रावीण्यं कुमारेण

जनकः[2]। (विचिन्त्य) यदि त्वमीदृशः कथायामभिज्ञस्तद् ब्रूहि तावत् पृच्छामस्तेषां दशरथात्मजानां किन्नामधेयान्यपत्यानि केषु केषु दारेषु प्रसूतानीति।

लवः। नायं कथाप्रविभागोऽस्माभिरन्येन वाश्रुतपूर्वः।

जनकः। किं न प्रणीत एव कविना।

लवः। प्रणीतो न तु प्रकाशितः। तस्यैव कोऽप्येकदेशः सन्दर्भान्तरेण रसवानभिनेयार्थः कृतः। तंच स्वहस्तलिखितं मुनिर्भगवान् व्यसृजद्भरतस्य मुनेस्तौर्यत्रिक-सूत्रकारस्य[3]।

---

१ एतावेदेव।

२ जनकः। अथ किम्।
लवः। तौ कथं न जानामि।
जनकः। तस्य लक्ष्मणस्यायमात्मजश्चन्द्रकेतुः।

३ सूत्रधारस्य।

Digitized by Google

जनकः । किमर्थम् ।

लवः। स किल भगवांस्तमप्सरोभिः प्रयोजयिष्यतीति।

जनकः । सर्वमिदमस्माकमाकूतकरम् ।

लवः। महती पुनस्तस्मिन् भगवतो वाल्मीकेरास्था । केषांचिदन्तेवासिनां हस्तेन तत् पुस्तकं भरताश्रमं प्रेषितं । तेषामानुयात्रिकश्चापपाणिः प्रमादापनोदनार्थमस्मद्भ्राता प्रेषितः ।

कौशल्या । भादा वि दे अत्थि (भ्राताऽपि तेऽस्ति)।

लवः । अस्त्यार्यः कुशो नाम ।

कौशल्या । जेट्ठो त्ति भणिदं होदि (ज्येष्ठ इति भणितं भवति) ।

लवः । एवमेतत् प्रसवक्रमेण स किल ज्यायान् ।

जनकः । यमजावायुष्मन्तौ ।

लवः । अथ किम् ।

जनकः । कथय कथाप्रबन्धस्य कीदृशः पर्यन्तः ।

लवः । अलीकपौरप्रवादोद्विग्नेन राज्ञा निर्वासितां देवयजनसम्भवां सीतां देवीमासन्नप्रसववेदनामेकाकिनी मरण्ये परित्यज्य लक्ष्मणः प्रतिनिवृत्त इति ।

कौशल्या । हा वच्छे मुद्धचन्दमुहि को दाणीं दे सरीरकुसुमस्स देव्वदुव्विलासपरिणामो एअलिआए णिवडितो (हा वत्से मुग्धचन्द्रमुखि क इदानीं ते शरीरकुसुमस्य दैवदुर्विलासपरिणाम एकाकिन्या निपतितः ।)

जनकः । हा वत्स

---

१ भगवान् भरतः ।
२ अप्रमादार्थम् ।
३ कथय कथाप्रन्वधःकीदृशपर्यन्तः
४ कुसुमभूतस्य शरीरस्य ।
कुसुमरूपस्य शरीरस्य ।

Digitized by Google

नूनं त्वया परिभवं च नवं च घोरं
तां च व्यथां प्रसवकालकृतामवाप्य।
क्रव्याद्गणेषु परितः परिवारयत्सु
संत्रस्तया शरणमित्यसकृत् स्मृतोऽस्मि[1] ॥ २३ ॥

लवः। (अरुन्धतीं प्रति) आर्ये कावेतौ।

अरुन्धती। इयं कौसल्याऽयं जनकः।

लवः। (सबहुमानखेदकौतुकं पश्यति)

जनकः। अहो दुर्मर्यादता पौराणाम्। अहो रामस्य राज्ञः क्षिप्रकारिता।

एतद्वैशसघोरवज्रपतनं शश्वन्ममोत्पश्यतः
क्रोधस्य ज्वलितुं धगित्यवसरश्चापेन शापेन वा।

कौशल्या। भअवदि परित्ताहि परिताहि पसादेहि रुसिदं राएसिं (भगवति परित्रायस्व परित्रायस्व प्रसादय रुषितं राजर्षिम्)।

अरुन्धती। एताद्धि परिभूतानां प्रायश्चित्तं मनस्विनाम्।
राजन्नपत्यं रामस्ते पाल्याश्च कृपणाः प्रजाः ॥ २४ ॥

जनकः। शान्तं वा रघुनन्दने तदुभयं तत् पुत्रभाण्डं हि मे
भूयिष्ठद्विजबालवृद्धविकलस्त्रैणश्च पौरो जनः ॥ २५ ॥

(प्रविश्य)

संभ्रान्ता बटवः। अश्वोऽश्व इति कोऽपि भूतविशेषो जनपदेषु श्रूयते सोऽयमधुनास्माभिः प्रत्यक्षीकृतः।

लवः। अश्व इति पशुसमाम्नाये सांग्रामिके च पठ्यते। तद्ब्रूत कीदृशः।

बटवः। श्रूयताम्

---

१ कृतेऽस्मि।
२ झटित्यवसरः।
३ कुमार अश्वोऽश्व इति पशुसमाम्नाये कोऽपिभूतविशेषः। इति पशुसमाम्नायिकःकोऽपि।

Digitized by Google

पश्चात् पुच्छं वहति विपुलं तच्च धूनोत्यजस्रं
दीर्घग्रीवः स भवति खुरास्तस्य चत्वार एव।
शष्पाण्यत्ति प्किरति शकृत्पिण्डकानाम्रमात्रान्
किं वा ख्यातैर्व्रजति स पुनर्दूरमेवोह यामः ॥२६॥

(इत्युपसृत्याजिने हस्तयोश्चाकर्षन्ति)

लवः। (सकौतुकोपरोधविनयम्)। आर्याः पश्यत पश्यतैभिर्नीतोऽस्मि। (इति त्वरितं परिक्रामति)

अरुन्धतीजनकौ। पूरयतु कौतुकं वत्सः।

कौशल्या। भअवदि- जाणामि एदं अणालोअअन्ती ण जीआमि विअ अदो अण्णदो भविअ पेक्खह दाव गच्छमाणं दीहाउं (भगवति जानाम्येतमनालोकयन्ती न जीवामीवातोऽन्यतो भूत्वा प्रेक्षामहे तावद्गच्छन्तं दीर्घायुषम्)।

अरुन्धती। दूरमतिक्रान्तः स चपलः कथं दृश्यते।

(प्रविश्य)

कञ्चुकी। भगवान् वाल्मीकिराह ज्ञातव्यमेतदवसरे भवद्भिरिति।

जनकः। अतिगम्भीरमेतत् किमपि भविष्यति। भगवति अरुन्धति सखि कौशल्ये आर्य गृष्टे स्वयमेव गत्वा भगवन्तं प्राचेतसं पश्यामः। (निष्क्रान्तो वृद्धवर्गः)

बटवः। पश्यतु कुमारस्तदाश्चर्यम्।

लवः। दृष्टमवगतं च। नूनमाश्वमेधिकोऽयमश्च इति।

बटवः। कथं ज्ञायते।

लवः। ननु मूर्खाः पठितमेव युष्माभिस्तत्काण्डे। किं न

---

१ अतिजवेन दूरमतिक्रान्तः स चपलः। कथं दृश्यते।

२ तत्काण्डम्।

Digitized by Google

पश्यथ प्रत्येकं शतसंख्याः कवचिनो दण्डिनो निषङ्गिणश्च रक्षितारस्तत्प्रायमेव बलमिदं दृश्यते। यदीह न प्रत्ययस्तद्गत्वा पृच्छत।

बटवः। भो भोः किंप्रयोजनोऽयमश्वः परिवृतः पर्यटति।

लवः। (सस्पृहमात्मगतम्) अये अश्वमेध इति विश्वविजयिनां क्षत्रियाणामूर्जस्वलः सर्वक्षत्रियपरिभावी महानुत्कर्षनिकषः। (नेपथ्ये)

अयमश्वः पताकेयमथवा वीरघोषणा।
सप्तलोकैकवीरस्य दशकण्ठकुलद्विषः॥ २७॥

लवः। (सव्यथमिव) अहो सन्दीपनान्यक्षराणि।

बटवः। किमुच्यते। प्राज्ञः खलु कुमारः।

लवः। भो भोस्तत् किमक्षत्रिया पृथ्वी यदेवमुदीर्यते। (नेपथ्ये)

अरे महाराजं प्रति कुतः क्षत्रियाः।

लवः। धिग्जाल्मान्।

यदि ते सन्ति सन्त्वेव केयमन्या बिभीषिका।
किमुक्तैः सांप्रतमेव पतां वो हराम्यहम्॥२८॥

भो भो बटवः लोष्टैर्घ्नन्तः परावर्तयतैनमश्वम्। एष रोहितानां मध्ये वराकश्चरतु।

(प्रविश्य)

सक्रोधदर्पःपुरुषः। धिक् चापलं किमुक्तवानसि तीक्ष्ण-

---

१ तत्प्रायमेवेदमपि।
२ उत्कर्षनिष्कर्षः।
३ यदेवमुद्धतमुद्घोष्यते।
४ किमुक्तैः शरसंधाधां।
५ भो भो बटवः परिवृत्य लोष्टैरभिघ्नन्तो नयतैनमश्वम्।

Digitized by Google

नीरसा आयुधीयश्रेणयः शिशोरपि दृप्तां वाचं नसहन्ते । राजपुत्रश्चन्द्रकेतुररिविमर्दनः सौम्यपूर्वारण्यदर्शनकुतूहलाक्षिप्तहृदयो न यावदायाति तावत्त्वरितमनेन तरुगहनेनापसर्पत ।

बटवः । कुमार कृतमनेनाश्वेन तर्जयन्तिविस्फुरितशस्त्राः कुमारमायुधीयश्रेणयो दूरे चाश्रमपदमितस्तदेहि हरिणप्लुतैः पलायामहे ।

लवः । (विहस्य) किं नाम विस्फुरन्ति शस्त्राणि (धनुरारोपयन्)

ज्याजिह्वया वलयितोत्कटकोटिदंष्ट्र-
मुद्दारिघोरघनघर्घरघोषमेतत् ।
ग्रासप्रसक्तहसदन्तकवत्क्रयन्त्र-
जृम्भाविडम्बिविकटोदरमस्तु चापम् ॥ २९ ॥

(इति यथोचितं परिक्रम्य निष्क्रान्ताः सर्वे)

कौशल्याजनकयोगो नाम

चतुर्थोऽङ्कः ।

---

१ शिशोरपि न दृप्तां वाचमनुसहन्ते । राजपुत्रश्चन्द्रकेतुराकृष्टशरासनः। सोऽप्यपूर्वारण्यदर्शनकौतुकाक्षिप्तहृदयो न परापतत्यद्यापि । तत्त्वरितमपसर्पतानेन तरुगहनेन ।

Digitized by Google

नेपथ्ये

भोः भो सैनिका जातं जातमवलम्बनमस्माकम्।
नन्वेष त्वरितसुमन्त्रनुद्यमान-
व्यावल्गत्प्रजवनवाजिना रथेन।
उद्घातप्रचलितकोविदारकेतुः
श्रुत्वा नैः[1] प्रधनमुपैति चन्द्रकेतुः ॥ १ ॥

(ततः प्रविशति सुमन्त्रसारथिना रथेन धनुष्पाणिः साद्भुत-हर्षसंभ्रमश्चन्द्रकेतुः)

चन्द्रकेतुः। आर्य सुमन्त्र पश्य पश्य
किरति कलितकिञ्चित्कोपरज्यन्मुखश्री-
रनवरतनिगुञ्जत्[2] कोटिना कार्मुकेण।
समरशिरसि चञ्चत्पञ्चचूडश्चमूना-
मुपरि शरतुषारं कोप्ययं वीरपोतः ॥ २ ॥

आश्चर्यमाश्चर्यम्
मुनिजनशिशुरेकः सर्वतः सैन्यकाये
नव इव रघुवंशस्याप्रसिद्धः प्ररोहः।
दलितकरिकपोलग्रन्थिटङ्कारघोर-[4]
ज्वलितशरसहस्रैः[5] कौतुकं मे करोति ॥ ३॥

सुमन्त्रः। आयुष्मन्
अतिशयितसुरासुरप्रभावं शिशुमवलोक्य तवैव[6] तुल्यरूपम्।
कुशिकसुतमखद्विषां प्रमाथे धृतधनुषं रघुनन्दनं स्मरामि॥४

चन्द्रकेतुः। इममेकमुद्दिश्य भूयसामारम्भ इति हृदयमपत्रपते।

---

१ केतु।
२ वः।
३ अविरतगुणगुञ्जत्।
४ टङ्कारघोरं ज्वलित-।
५ ज्वलितशरसहस्रैः।
६ तथैव।
७ अवष्टम्भः।

Digitized by Google

अयं हि शिशुरेककः समररेणुभूरिस्फुरत्-
करालकरकन्दलीकलितशस्त्रजालैर्बलैः ।
क्वणत्कनककिङ्किणीझणझणायितस्यन्दनै-
रमन्दमददुर्दिनद्विरदवारिदैरावृतः ॥ ५ ॥

सुमन्त्रः। वत्स एभिः समस्तैरपि किमस्य किं पुनर्व्यस्तैः।

चन्द्रकेतुः । आर्य त्वर्यतां त्वर्यतामनेन हि महानाश्रितजनप्रमाथोऽस्माकमारब्धः । तथाहि

आगुञ्जद्भिरिकुञ्जकुञ्जरघटाविस्तीर्णकर्णज्वरं
ज्यानिर्घोषममन्ददुन्दुभिरवैराध्मातमुज्जृम्भयन् ।
वेल्लद्भैरवरुण्डमुण्डनिकरैर्वीरो विधत्ते भुव-
स्तृप्यत्कालकरालवक्त्रविधसव्याकीर्यमाणा इव ॥६॥

सुमन्त्रः । (स्वगतम्) कथमीदृशेन सह वत्सस्य चन्द्रकेतोर्द्वन्द्वसंप्रहारमनुजानीयाम् । (विचिन्त्य) अथवेक्ष्वाकुगृहवृद्धाः खलु वयं । प्रत्युपस्थिते रणे च का गतिः ।

चन्द्रकेतुः । (सविस्मयलज्जासंभ्रमम्) धिक् प्रतिनिवृत्तानि सर्वतः सैन्यानि मम ।

सुमन्त्रः । (रथवेगमभिनीय) आयुष्मन् एष[2] वाग्विषयीभूतः स वीरः ।

चन्द्रकेतुः । (विस्मृतीमभिनीय) । आर्य[3] किमस्य नामधेयमाख्यातमाख्यायकैः ।

सुमन्त्रः । लव इति ।

---

१ समरभारभूरिस्फुरत् ।
२ जाटिल ।
३ स एष वाग्विषयीकृतस्ते प्रवीरः ।
४ आर्य किं नामधेयमाख्यातमस्य हेतिकैः ।

Digitized by Google

चन्द्रकेतुः। भो भो लव महाबाहो किमेभिस्तव सैनिकैः
एषोहमेहि मामेव तेजस्तेजसि शाम्यतु ॥७॥

सुमन्त्रः। कुमार पश्य पश्य
व्यपवर्तत एष बालवीरः पृतनानिर्मथनात् त्वयोपहूतः।
स्तनयित्नुरवादिभावलीनामवमर्दादिव दृप्तसिंहशावः॥८

(ततः प्रविशति त्वरितोद्धतक्रमो लवः)

लवः। साधु राजपुत्र साधु सत्यमैक्ष्वाकः खल्वसि तदयं परागत एवास्मि।

(नेपथ्ये महान् कलकलः)

लवः। (सावेगं परावृत्य) आः कथमिदानीं भग्ना अपि प्रतिनिवृत्य युद्धाभिसारिणः पर्यवष्टभ्य निघ्नन्ति मां चमूपतयः। धिग्जाल्मान्।

अयं शैलाघातक्षुभितवडवावक्त्रहुतभुक्-
प्रचण्डक्रोधार्चिर्निचयकवलत्वं व्रजतु मे।
समन्तादुत्सर्पन् घनतुमुलसेनाकलकलः
पयोराशेरोघः प्रलयपवनास्फालित इव ॥ ९ ॥

(इति परिक्रामति)

चन्द्रकेतुः। भो भोः कुमार
अत्यद्भुतादसि[2] गुणातिशयात्प्रियो मे
तस्मात्सखा त्वमसि यन्मम तत्तवैव।
तत्किं निजे परिजने कदनं करोषि
नन्वेष दर्पनिकषस्तव चन्द्रकेतुः ॥ १० ॥

लवः। (सहर्षसंभ्रमं परावृत्य) अहो महानुभावस्य प्रसङ्गकर्कशा वीरवचनप्रयुक्तिर्विकर्तनकुलकुमारस्य। तत्किमेभिरेनमेव तावत् संभावयामि।

---

१ हेला।
२ अत्यद्भुतादपि गुणातिशयात्प्रियो मे योसि।

Digitized by Google

(पुनर्नेपथ्ये कलकलः)

लवः । (सक्रोधनिर्वेदम्) आः कदर्थितोऽहमेभिर्वीर-संवादविघ्नकारिभिः पापैः । (तदभिमुखं परिक्रामति)

चन्द्रकेतुः । आर्य दृश्यतां द्रष्टव्यमेतत्

दर्पेण कौतुकवता मयि बद्धलक्ष्यः
पश्चाद्बलैरनुसृतोऽयमुदीर्णधन्वा ।
द्वेधासमुद्धतमरुत्तरलस्य धत्ते
मेघस्य माघवतचापधरस्य लक्ष्मीम् ॥ ११ ॥

सुमन्त्रः । कुमार एवैनं द्रष्टुमपि जानाति । वयं तु केवलं परवन्तो विस्मयेन ।

चन्द्रकेतुः । भो भो राजानः

संख्यातीतैर्द्विरदतुरगस्यन्दनस्थैः पदाता-
यत्रैकस्मिन् कवचनिचितैर्मेध्यचर्मोत्तरीये ।
कालज्येष्ठैरभिनववयःकाम्यकाये भवद्भि-
र्योऽयं बद्धो युधि परिकरस्तेन वो धिग् धिगस्मान् १२

लवः । (सोन्माथम्) कथमनुकम्पते नाम । (विचिन्त्य) भवतु कालहरणप्रतिषेधाय जृम्भकास्त्रेण तावत् सैन्यानि संस्तम्भयामि । (इति ध्यानं नाटयति)

सुमन्त्रः । तत् किमकस्मादस्मत्सैन्यघोषः प्रशाम्यति ।

लवः । पश्याम्येनमधुना सप्रगल्भम् ।

सुमन्त्रः । वत्स मन्ये कुमारकेणानेन जृम्भकास्त्रमा-मन्त्रितम् ।

चन्द्रकेतुः । अत्र कः संदेहः

---

१ वारं वारं विघ्नकारिभिर्घोषैः ।
२ अचरमवयः ।
३ सक्षोभम् ।
४ अस्माकं बले सैन्यघोषाः प्रशाम्यन्ति ।
५ भवत्सैन्यं मन्त्रेण स्तम्भितम् ।

Digitized by Google

व्यतिकर इह भीमस्तामसो वैद्युतश्च
प्रणिहितमपि चक्षुर्ग्रस्तमुक्तं हिनस्ति।
अथ लिखितमिवैतत् सैन्यमस्पन्दमास्ते
नियतममितवीर्यं[1] जृम्भते जृम्भकास्त्रम्[2] ॥ १३ ॥

आश्चर्यमाश्चर्यम्

पातालोदरकुञ्जपुञ्जितमःश्यामैर्नभो जृम्भकै-
रुत्तप्तस्फुरदारकूटकपिलज्योतिर्ज्वलद्दीप्तिभिः।
कल्पाक्षेपकठोरभैरवमरुद्व्यस्तैरवाकीर्यते[3]
मीलन्मेघतडित्कडारकुहरैर्विन्ध्याद्रिकूटैरिव ॥ १४ ॥

सुमन्त्रः। कुतः पुनरस्य जृम्भकाणामागमः स्यात्।

चन्द्रकेतुः। भगवतः प्राचेतसादिति मन्यामहे।

सुमन्त्रः। नास्य व्यवहारोऽस्त्रेषु विशेषतो जृम्भकेषु। यतः

कुशाश्वतनया ह्येते कुशाश्वात् कौशिकं गताः।
अथ तत्संप्रदायेन रामभद्रे स्थिता[4] इति ॥ १५ ॥

चन्द्रकेतुः। अपरेऽपि परमोपचीयमानसत्वप्रकाशाः स्वयं हि मन्त्रदृशः पश्यन्ति।

सुमन्त्रः। वत्स सावधानो भव परागतः प्रवीरः।

कुमारौ। (अन्योन्यं प्रति) अहो प्रियदर्शनः कुमारः। (सस्नेहानुरागं निर्वर्ण्य)

यदृच्छासंवादः किमु किमु गुणानामतिशयः
पुराणो वा जन्मान्तरनिबिडबन्धः परिचयः।
निजो वा संबन्धः किमु विधिवशात् कोऽप्यविदितो
ममैतस्मिन् दृष्टे हृदयमवधानं रचयति ॥ १६ ॥

सुमन्त्रः। भूयसा जीविधर्म एष यद्रसमयी कस्यचित् क्वचित्प्रीतिः। यत्र लौकिकानां व्यवहारस्तारामैत्रकं चक्षूराग इति। तमप्रतिसंख्येयमनिबन्धनं प्रेमाणमामनन्ति।

---

१ इव।
२ अजितवीर्यो।
३ अवस्तीर्यते।
४ रामभद्रे व्यवस्थिताः।
५ उपचारस्तारामैत्रकमिति।

Digitized by Google

अहेतुः पक्षपातो यस्तस्य नास्ति प्रतिक्रिया ।
स हि स्नेहात्मकस्तन्तुरन्तर्मर्माणि सीव्यति ॥१७॥

कमारौ । (अन्योन्यं प्रति)

एतस्मिन् मणितराजपट्टकान्ते
मोक्तव्याः कथमिव सायकाः शरीरे ।
यत्प्राप्तौ मम परिरम्भणाभिलाषा-
दुन्मीलत्पुलककदम्बमङ्गमास्ते[1] ॥ १८ ॥

किन्त्वाक्रान्तकठोरतेजसि गतिः[2]का नाम शस्त्रं विना
शस्त्रेणापि हि तेन किं न विषयो जायेत यस्येदृशः ।
किं वक्ष्यत्ययमेव युद्धविमुखं मामुद्यतेऽप्यायुधे
वीराणां समयो हि दारुणरसः स्नेहक्रमं बाधते॥१९॥

सुमन्त्रः । (लवं निर्वर्ण्य सास्रमात्मगतम्) हृदय किमन्यथा परिकल्पसे ।

मनोरथस्य यद्बीजं तद्दैवेनादितो हतम्[3] ।
लतायां पूर्वलूनायां प्रसूनस्यागमः कुतः ॥ २० ॥

चन्द्रकेतुः । अवतराम्यार्य सुमन्त्र स्यन्दनात् ।

सुमन्त्रः । तत्कस्य हेतोः ।

चन्द्रकेतुः । यतस्तावदयं वीरपुरुषः पूजितो भवति । अपि च खल्वार्य क्षात्रधर्मस्सम्यगनुगतो भवति।न रथिनः पादचारमायोधयन्तीति शास्त्रविदः परिभाषन्ते[4] ।

सुमन्त्रः । (स्वगतम्) कष्टं बतानुप्रपन्नोऽस्मि ।

कथं न्याय्यमनुष्ठानं मादृशः प्रतिषेधतु ।
कथं वाप्यनुजानातु[5] साहसैकरसां क्रियाम् ॥ २१ ॥

---

१ आबद्धोत्पुलकमसङ्गम् ।
२ अयमेवमद्य विमुखं ।
३ हृतम् ।
४ शस्त्रदेवताः ।
५ वाभ्यनुजानातु ।

Digitized by Google

चन्द्रकेतः। यदा तातमिश्रा अपि पितुः प्रियं सखार्यं धर्मसंश्रयं चार्यमेव पृच्छन्ति तत् किमार्यो विमृशति।

सुमन्त्रः। आयुष्मन् एवं यथाधर्ममभिमन्यसे।

एष संग्रामिको न्याय एष धर्मः सनातनः।
इयं हि रघुसिंहानां वीरचारित्रपद्धतिः॥ २२॥

चन्द्रकेतुः। प्रतिरूपं वचनमार्यस्य।

इतिहासं पुराणं च धर्मप्रवचनानि च।
भवन्त एव जानन्ति रघूणां च कुलस्थितिम्॥२३॥

सुमन्त्रः। (सस्नेहास्त्रं परिष्वज्य)

जातस्य ते पितुरपीन्द्रजितो निहन्तु-
र्वत्सस्य वत्स कति नाम दिनान्यमूनि।
तस्याप्यपत्यमनुगच्छति वीरवृत्तं
दिष्ट्या गतं दशरथस्य कुलं प्रतिष्ठाम्॥ २४॥

चन्द्रकेतुः। (सकष्टम्)

अप्रतिष्ठे रघुज्येष्ठे का प्रतिष्ठा कुलस्य नः।
इति दुःखेन तप्यन्ते त्रयो नः पितरोऽपरे॥ २५॥

सुमन्त्रः। अहह हृदयमर्मदारुणान्येतानि चन्द्रकेतोर्वचनानि।

लवः। हन्त मिश्रीकृतो रसक्रमो वर्तते।

यथेन्दावानन्दं व्रजति समुपोढे कुमुदिनि
तथैवास्मिन् दृष्टिर्मम कलहकामः पुनरयम्।
क्वणत्कारक्रूरक्वणितगुणगुञ्जद्गुरुधनु-
र्धृतप्रेमा बाहुर्विकचविकरालोल्वणरसः॥ २६॥

चन्द्रकेतुः। (अवतरन्) आर्य सावित्रश्चन्द्रकेतुरभिवादयते।

---

१ विजेतुः।
२ हृदयमर्मदारणानि।
३ रसो।
४ विकटविकारालव्रणमुखः।

Digitized by Google

सुमन्त्रः । अजितं पुण्यमूर्जस्वि[1] कक्षुत्स्थस्येव ते महः ।
श्रेयसे शाश्वतो देवो वराहः परिकल्पताम् ॥२७॥

अपिच ।

देवस्त्वां सविता धिनोतु समरे गोत्रस्य यस्ते पिता
त्वां मैत्रावरुणोऽभिनन्दतु गुरुर्यस्ते गुरूणामपि ।
ऐन्द्रं[2] वैष्णवमाग्निमारुतमथो सौपर्णमोजोस्तु ते
देयादेव च रामलक्ष्मणधनुर्ज्यार्घोषमन्त्रो जयम् २८

लवः । कुमार अति हि नाम शोभसे रथस्थ एव । कृतं कृतमस्मादरेण ।

चन्द्रकेतुः । तर्हि महाभागोप्यन्यं रथमलंकरोतु ।

लवः । आर्य मारोपय रथोपरि राजपुत्रम् ।

सुमन्त्रः । त्वमप्यनुरुध्यस्व वत्सस्य चन्द्रकेतोर्वचनम् ।

लवः । को विचारः स्नेषूपकरणेषु । किन्त्वरण्यसदो वयमनभ्यस्तरथचर्याः ।

सुमन्त्र । जानासि वत्स दर्पसौजन्ययोर्यथोचितमाचरितुम् । यदि पुनस्त्वामीदृशमैक्ष्वाको राजा रामभद्रः पश्येत्तदा तस्य स्नेहेन हृदयमभिष्यन्देत ।

लवः । आर्य सुजनः स राजर्षिः श्रूयते । (सलज्जमिव)

वयमपि न खल्वेवं प्रायाः क्रतुष्वपिमत्सराः[3]
कं इव न गुणैस्तं राजानं जनो बहु मन्यते ।
तदपि खलु मे स व्याहारस्तुरङ्गमरक्षिणां
विकृतिमखिलक्षत्राक्षेपप्रचण्डतयाकरोत् ॥ २९ ॥

चन्द्रकेतुः । (सस्मितम्) किमु भवतस्तातप्रतापोत्कर्षेऽप्यमर्षः ।

---

१ पुण्यमोजस्वि ।
२ ऐन्द्रावैष्णव ।
३ क्रतुप्रतिघातिनः ।
४ क इह च गुणैस्तं राजानं न वा बहु मन्यते ।

Digitized by Google

लवः। अस्त्वहामर्षो मा वा। एतत्तु पृच्छामि दान्तं हि राजानं राघवं शृणुमः स किल नात्मना[1] दृप्यति नास्य प्रजा वा दृप्ता जायन्ते तत्किं मनुष्यास्तस्य राक्षसीं वाचमुदीरयन्ति।

ऋषयो राक्षसीमाहुर्वाचमुन्मत्तदृप्तयोः।
सा योनिः सर्ववैराणां सा हि लोकस्य निर्ऋतिः ३०

इति ह स्म तां निन्दन्ति। अथैतरामभिष्टुवन्ति।

कामान् दुग्धे विप्रकर्षत्यलक्ष्मीं
कीर्तिं सूते दुष्कृतं या हिनस्ति।
तां चाप्येतां मातरं मङ्गलानां
धेनुं धीराः सूनृतां वाचमाहुः ॥ ३१ ॥

सुमन्त्रः। परिपूतस्वभावोयं कुमारः प्राचेतसान्तेवासी वदत्ययमभिसंपन्नमार्षेण संस्कारेण।

लवः। यत् पुनश्चन्द्रकेतो वदसि किन्नु भवतस्तातमतापोत्कर्षेऽप्यमर्ष इति तत्पृच्छामि किं व्यवस्थितविषयाः क्षत्रधर्मा इति।

सुमन्त्रः। नैव खलु जानासि देवमैक्ष्वाकम्। तद्विरम विरमातिप्रसङ्गात्।

सैनिकानां प्रमाथेन सत्त्वमोजायितं त्वया।
जामदग्न्यस्य दमने नैवं निर्वक्तुमर्हसि[3] ॥ ३२ ॥

लवः। (सहासम्) आर्य जामदग्न्यस्यापि दमनः स राजेति कोऽयमुच्चैर्वादः।

सिद्धं ह्येतद्वाचि वीर्यं द्विजानां
बाह्वोर्वीर्यं यत्तु तत् क्षत्रियाणाम्।

---

१ नाप्यस्य प्रजासु दृप्तत्वं जायते। २ शुद्धां शान्तां मातरं। ३ नातिनिर्वक्तुमर्हसि।

Digitized by Google

शस्त्रग्राही ब्राह्मणो जामदग्न्य-
स्तस्मिन्दान्ते का स्तुतिस्तस्य राज्ञः ॥३३॥

चन्द्रकेतुः । (सोन्मादमिव) आर्य आर्य कृतमुत्तरोत्तरेण

कोप्येष संप्रति नवः पुरुषावतारो
वीरो न यस्य भगवान् भृगुनन्दनोऽपि ।
पर्याप्तसप्तभुवनाभयदक्षिणानि
पुण्यानि तातचरितानि च यो न वेद ॥ ३४ ॥

लवः । को हि रघुपतेश्चरितं महिमानं च न जानाति । यदि नाम किंचिद्वक्तव्यमस्ति । अथवा शान्तम्

वृद्धास्ते न विचारणीयचरितास्तिष्ठन्तु किं वर्ण्यते
सुन्दस्त्रीदमनेप्यखण्डयशसो लोके महान्तो हि ते ।
यानि त्रीण्यपराङ्मुखान्यपि पदान्यासन् खरायोधने
यद्वा कौशलमिन्द्रसूनुनिधने तत्राप्यभिज्ञो जनः ३५

चन्द्रकेतुः । आः तातापवादभिन्नमर्याद अति हि नाम प्रगल्भसे ।

लवः । अये मय्येव भ्रुकुटीधरः संवृतः ।

सुमन्त्रः । स्फुरितमनयोः क्रोधेन । तथाहि

चूडामण्डलबन्धनं तरलयत्याकूतजो वेपथुः
किञ्चित्कोकनदच्छदस्य सदृशे नेत्रे स्वयं रज्यतः ।
धत्ते कान्तिमकाण्डताण्डवितयोर्मध्येन वक्रं भ्रुवो-
श्चन्द्रस्योत्कटलाञ्छनस्य कमलस्योद्भ्रान्तभृङ्गस्य च ॥३६॥

कुमारौ । तदितो विमर्दक्षमां भूमिमवतरावः ।

(निष्क्रान्ताः सर्वे)

कुमारविक्रमो नाम
पञ्चमोऽङ्कः ।

---

१ श्लाघ्यो न यस्य ।
२ तातस्य किञ्च चरितान्यपि ।
३ वन्द्यास्ते न विचारणीयचरिता-स्तिष्ठन्तु हुं वर्तताम् ।
४ अकुतोभयानि ।
५ दमने ।

Digitized by Google

(ततः प्रविशति विमानेनोज्वलनेन विद्याधरामिथुनम्)

विद्याधरः। अहो नु खलु भो अनयोर्विकर्तनकुलकुमारयोरकाण्डप्रचण्डकलहयोरुद्योतितक्षात्रलक्ष्मीकयोरद्भुतोद्भ्रान्तदेवासुराणि विक्रान्तचरितानि। तथाहि प्रिये पश्य पश्य

झणज्झणितकङ्कणक्वणितकिङ्किणीकं धनु-
र्ध्वनद्गुरु गुणाटनीकृतकरालकोलाहलम्।
वितत्य किरतोः शरानविरतस्फुरच्चूडयो-
र्विचित्रमभिवर्द्धते भुवनभीमंमायोधनम् ॥ १ ॥

विजृम्भितं च दिव्यस्त्रैय मङ्गलाय द्वयोरपि।
स्तनयित्नोरिवामन्द्रं दुन्दुभेर्दुमदुमायितम् ॥ २ ॥

तत्प्रवर्त्तामनयोः प्रवीरयोरनवरतमविरललुलितविकचनककमलकमनीयसन्ततिरमरतरुतरुणमणिमुकुलनिकरमकरन्दसुन्दरः पुष्पनिपातः।

विद्याधरी। ता किं त्ति उण अआण्डविप्फुरिदतडिच्छडाकडारं विअ अम्बरं झत्ति संवुत्तं। (तत्किमिति पुनरकाण्डविस्फुरिततडिच्छटाकडारमिवाम्बरं झटिति संवृत्तम्)।

विद्याधरः। तत् किन्नु खल्वद्य

त्वाष्ट्रयन्त्रभ्रमिभ्रान्तमार्तण्डज्योतिरुज्वलः।
पुटभेदो ललाटस्थनीललोहितचक्षुषः ॥ ३ ॥

(विचिन्त्य) आं ज्ञातं वत्सेन चन्द्रकेतुना प्रयुक्तमस्त्रमाग्नेयम्। तस्यायमग्निच्छटासम्पातः। संप्रति हि

---

१ अकाण्डकलहकरणप्रचण्डयोः। अकाण्डकलहप्रचण्डयोः।
२ उद्योतितक्षात्रलक्ष्मीकाणि।
३ भुवनाचित्रम्।
४ दिव्यास्त्रम्।
५ लुलित।
६ संहतिः।
७ अआण्डतण्डविदुद्दण्डतरलिततडिच्छडाकडारं (अकाण्डताण्डवितोद्दण्डतरलिततडिच्छटाकडारं।

Digitized by Google

अवदग्धकर्बुरितकेतुचामरै-
रपयातमेव हि विमानमण्डलैः ।
दधति ध्वजाङ्कुशपटाञ्चलेष्विमाः
क्षणकुङ्कुमच्छुरणविभ्रमं शिखाः ॥ ४ ॥

आश्चर्यं प्रवृत्त एवायमुच्चण्डवज्रखण्डावस्फोटपटुरटत्स्फुलिङ्गगुरुत्तालतुमुलेलिहानोज्वलज्वालासंभारभैरवो भगवानुषर्बुधः । प्रचण्डश्चास्य सर्वतः सन्तापः । तत्प्रियामङ्गेनाच्छाद्य दूरमपसरामि । (तथा करोति)

विद्याधरी । दिट्ठिआ एदेण विमलमुत्ताहलसीदलसिणिद्धमसिणमंसलेण णाहदेहप्फंसेण आणन्दमन्दमुउलिदघुण्णन्तलोअणाए अप्पोदितो एव अन्तरिदो मे सन्दावो (दिष्ट्यैतेन विमलमुक्ताफलशीतलस्निग्धमसृणमांसलेन नाथदेहस्पर्शेनानन्दमुकुलितघूर्णलोचनाया अल्पोदित एवान्तरितो मे सन्तापः)।

विद्याधरः । अयि किमत्र मया कृतम् । अथवा

अकिञ्चिदपि कुर्वाणः सौख्यैर्दुःखान्यपोहति ।
तत्तस्य किमपि द्रव्यं यो हि यस्य प्रियो जनः॥५॥

विद्याधरी । कहमविरलविलोलघुण्णन्तविज्जुलुदाविलासमण्डिदेहि मत्तमोरकण्ठसामलेहि अत्थरीअदि णहत्थलं जलहरेहि (कथमविरलविलोलघूर्णद्विद्युल्लुताविलासमण्डितैर्मत्तमयूरकण्ठश्यामलैरास्तीर्यते नभस्थलं जलधरैः) ।

विद्याधरः । हन्त हन्त कुमारलवप्रयुक्तवारुणास्त्रप्रभावः खल्वयम् । कथमविरलप्रयुक्तवारिधारासहस्रसंपातैः प्रशान्तं पावकास्त्रम् ।

विद्याधरी । पिअं मे पिअं मे (प्रियं मे प्रियं मे) ।

---

१ पटुतरस्फुलिङ्गविकटतिरुत्तालतुमुलेलिहानज्वालासंभार ।

Digitized by Google

विद्याधरः। हन्त हन्त भोः सर्वमतिमात्रं दोषाय यत्प्रलयवातावलिप्तोभगम्भीरगुणगुणायमानमेघमेदुरान्धकारनीरन्ध्रनिबद्धमेकवारविश्वग्रसनविकटविकरालकालकण्ठमुखकन्दरविवर्तमानमिव युगान्तयोगनिद्रानिरुद्धसर्वद्वारनारायणोदरनिविष्टमिव भूतजातं प्रवेपते। साधु वत्स चन्द्रकेतो साधु स्थाने वायव्यास्त्रमीरितम्। यतः

विद्याकल्पेन मरुता मेघानां भूयसामपि।
ब्रह्मणीव विवर्तानां क्वापि विप्रलयः कृतः ॥६॥

विद्याधरी। णाह को दाणीं एसो ससम्भमुक्खित्तकरब्भमिदुरिजाञ्चलो दूरदो एव महुरवअणपडिसिद्धजुज्झ वावारो एदाणं कुमाराणं अन्तराम्मि विमाणवरं ओदरावेदि। (नाथ क इदानीमेष ससंभ्रममुत्क्षिप्तकरभ्रमितोत्तरीयाञ्चलो दूरत एव मधुरवचनप्रतिषिद्धयुद्धव्यापार एतयोः कुमारयोरन्तरे विमानवरमवतारयति)।

विद्याधरः। (दृष्ट्वा) एष शम्बूकवधात् प्रतिनिवृत्तो रघुपतिः।

शब्दं महापुरुषसंविहितं निशम्य
तद्वीरवात् समुपसंहृतसंप्रहारः।
शान्तो लवः प्रणत एव च चन्द्रकेतुः
कल्याणमस्तु सुतसंगमनेन राज्ञः ॥ ७ ॥

(इति निष्क्रान्तौ)

विष्कम्भकः।

(ततः प्रविशति रामो लवः प्रणतश्चन्द्रकेतुश्च)

रामः। (पुष्पकादवतरन्)

---

१ विकच।
२ कालकण्ठकण्ठकन्दर।
३ करभ्रमिदपद्मकञ्चलो (करभ्रमितपद्मकाञ्चलो)।
४ पुनरागमनेन।

Digitized by Google

दिनकरकुलचन्द्र चन्द्रकेतो
सरभसमेहि दृढं परिष्वजस्व ।
तुहिनशकलशीतलैस्तवाङ्गैः
शममुपयातु ममापि चित्तदाहः ॥ ८ ॥

चन्द्रकेतुः । अभिवादये ।

रामः । (उत्थाप्य सस्नेहास्त्रं परिष्वज्य) अपि नाम कुशलं तव दिव्यास्त्रधरदेहस्य ।

चन्द्रकेतुः । कुशलमस्यद्भुतक्रियस्य प्रियदर्शनस्य लवस्याभ्युदयेन[1] । तद्विज्ञापयामि मामिव विशेषेण वा मत्तः शिवतरेण चक्षुषा पश्यत्वमुं महावीरप्रकाण्डं तातः ।

रामः । (लवं निरूप्य) दिष्ट्यातिकल्याणाकृतिरयं[2] वयस्यो वत्सस्य ।

त्रातुं लोकानिव परिणतः कायवानस्त्रवेदः
क्षात्रो धर्मः श्रित इव तनुं ब्रह्मघोषस्य[3] गुप्त्यै ।
सामर्थ्यानामिव समुदयः संचयो वा गुणाना-
मा[4]विर्भूय स्थित इव जगत्पुण्यनिर्माणराशिः ॥९॥

लवः । अहो पुण्यानुभावदर्शनोऽयं महापुरुषः ।

आश्वासस्नेहभक्तीनामेकमालम्बनं[5] महत् ।
प्रकृष्टस्येव धर्मस्य प्रसादो मूर्तिसंचरः[6] ॥ १० ॥

आश्चर्यम्

विरोधो विश्रान्तः प्रसरति रसो निर्वृतिघन-
स्तदौद्धत्यं क्वापि व्रजति विनयः प्रह्वयति माम् ॥
झटित्यस्मिन् दृष्टे किमपि परवानस्मि यदि वा
महार्घस्तीर्थानामिव हि महतां कोप्यतिशयः ॥११॥

---

१ लवस्य लाभाभ्युदयेन ।
२ अतिगम्भीराकृतिरयम् ।
३ ब्रह्मकोषस्य ।
४ एकमेवानुलम्बनम् ।
५ एकमायतनं महत् ।
६ मूर्तिसुन्दरः ।
७ किमिव ।

Digitized by Google

रामः । तत् किमयमेकपद एव दुःखविश्रामं ददात्युपस्नेहयति च कुतोपि निमित्तादन्तरात्मानम् । अथवा स्नेहश्च निमित्तसव्यपेक्ष इति विप्रतिषिद्धमेतत् । तथाहि

व्यतिषजति पदार्थानान्तरः कोऽपि हेतु-
र्न खलु बहिरुपाधीन् प्रीतयः संश्रयन्ते ।
विकसति हि पतङ्गस्योदये पुण्डरीकं
द्रवति च हिमरश्मावुद्गते चन्द्रकान्तः ॥ १२ ॥

लवः । चन्द्रकेतो क एते ।

चन्द्रकेतुः । प्रियवयस्य ननु तातपादाः ।

लवः । ममापि तर्हि धर्मतस्तथैव यतः प्रियवयस्य इत्थात्थ । किन्तु चत्वारः खलु भवतामेवंव्यपदेशभागिनस्तत्रभवन्तो रामायणकथापुरुषास्तद् विशेषं ब्रूहि ।

चन्द्रकेतुः । ननु ज्येष्ठतातपादा इत्यवेहि ।

लवः । (सोल्लासम्) कथं रघुनाथ एषः । दिष्ट्या सुप्रभातमद्य यदयं देवो दृष्टः । (सविनयकौतुकं निर्वर्ण्य) तात प्राचेतसान्तेवासी लवोऽभिवादयते ।

रामः । आयुष्मन् एह्येहि । (सस्नेहमालिङ्ग्य) अयि वत्स कृतं कृतमतिविनयेन । अनेकवारमपरिक्षतं परिष्वजस्व माम् ।

परिणतकठोरपुष्करगर्भच्छदपीनमसृणसुकुमारः ।
मन्दयति चन्द्रचन्दननिष्यन्दजडस्तव स्पर्शः ॥ १३ ॥

लवः । (स्वगतम्) ईदृशो[1] मां प्रत्यमीषामकारणस्नेहः । मया पुनरेभ्य[2] एवाभिद्रुग्धमज्ञेन । यदायुधपरिग्रहं यावदध्यारूढो दुर्योगः । (प्रकाशम्) मृष्यन्त्विदानीं लवस्य बालीशतां तातपादाः ।

---

१ ईदृशोऽस्मादृशान् प्रति ।
२ मया पुनरेभ्य एवाभिद्रोग्धुमज्ञेनायुधपरिग्रहः कृतः ।

Digitized by Google

रामः । किमपराद्धं वत्सेन ।

चन्द्रकेतुः । अश्वानुयात्रिकेभ्यस्तातमतापाविष्करण-मुपश्रुत्य वीरायितमनेन ।

रामः । नन्वयमलङ्कारः क्षत्रस्य ।

न तेजस्तेजस्वी प्रसृतमपरेषां प्रसहते
स तस्य स्वो भावः प्रकृतिनियतत्वादकृतकः ।
मयुखैरश्रान्तं तपति यदि देवो दिनकरः
किमाग्नेयो ग्रावा निकृत इव तेजांसि वमति॥१४॥

चन्द्रकेतुः । तात अमर्षोऽप्यस्यैव शोभते वीरस्य । पश्यतु[2] हि तातः प्रियवयस्यविनियुक्तजृम्भकास्त्रनिष्कम्पस्तम्भितानि सैर्वतः[3] सैन्यानि ।

रामः (विलोक्य) वत्स लव संहियतामस्त्रम् । त्वमपि चन्द्रकेतो निर्व्यापारविलक्षितानि सान्त्वय वलानि ।

लवः । यथाज्ञापयति तातः । (इति प्रणिधानं नाटयति)

चन्द्रकेतुः । यथादिष्टम् । (इति निष्क्रान्तः)

लवः । प्रशान्तमस्त्रम् ।

रामः । वत्स सरहस्यप्रयोगसंहरणान्यस्त्राण्यास्नायवन्ति ।

ब्रह्मादयो ब्रह्महिताय तप्त्वा
परः सहस्राः शरदस्तपांसि ।
एतान्यपश्यन् गुरवः पुराणाः
स्वान्येव तेजांसि तपोमयानि ॥ १५ ॥

अथैतन्मन्त्रपारायणोपनिषदं भगवान् कुशाश्वः परः सहस्रपरिवत्सरान्तेवासिने कौशिकाय विश्वामित्राय

---

१ वैरायितम् ।
२ परन्तु हि तात ।
३ सर्वसैन्यानि ।

Digitized by Google

प्रोवाच स तु भगवान् मद्यमित्येष तु[1] पूर्वानुक्रमः । कुमारस्य तु कैः[2] संप्रदाय इति पृच्छामि ।

लवः । स्वतः प्रकाशान्यावयोरस्त्राणि ।

रामः । (विचिन्त्य) किं न संभाव्यते कोऽपि प्रकृष्टपुण्यपरिपाकोपादानो महिमा स्यात् । द्विवचनं तु कथम् ।

लवः । भ्रातरावावां यमजौ ।

रामः । तर्हि[3] द्वितीयः कः ।

(नेपथ्ये)

भाण्डायन भाण्डायन

आयुष्मतः किल लवस्य नरेन्द्रसैन्यै-
रायोधनं ननु किमात्थ सखे तथेति ।
अद्यास्तमेतु भुवनेष्वधिराजशब्दः
शत्रस्य शस्त्रशिखिनः शममद्य यान्तु ॥ १६ ॥

रामः । अयि कोऽयमिन्द्रमणिमेचकच्छवि-
र्ध्वनिनैव दत्तपुलकं करोति माम् ।
नवनीलनीरधरधीरगर्जित-
क्षणबद्धकुड्मलकदम्बडम्बरम् ॥ १७ ॥

लवः । अयमसौ मम ज्यायानार्यः कुशो नाम भरताश्रमात् प्रतिनिवृत्तः ।

रामः । (सकौतुकम्) वत्स इत[4] औद्वयैनमायुष्मन्तम् ।

लवः । एवम् । (इति परिक्रामति)

---

१ इत्येषक्रमः । इत्येष तु गुरुपूर्वानुक्रमः ।
२ कुतः ।
३ स तार्हि द्वितीयः क ।
४ अथ ।
५ इत एवाद्वयैनमप्यायुष्मन्तम ।

Digitized by Google

(ततः प्रविशति कुशः)

कुशः । (साद्भुतहर्षधैर्यं धनुरास्फालयन्)

दत्तेन्द्राभयदक्षिणैर्भगवतो वैवस्वतादामनो-
र्दृप्तानां[1] दहनाय दीपितनिजक्षत्रप्रतापाग्निभिः ।
आदित्यैर्यदि विग्रहो नृपतिभिर्धन्यं ममैतत्ततो
दिव्यास्त्रस्फुरदुग्रदीधितिशिखानीराजितज्यं धनुः[2] ॥१८॥

(इति विकटं परिक्रामति)

रामः । कोप्यस्मिन् क्षत्रियपोतके पौरुषातिरेकः ।

दृष्टिस्तृणीकृतजगत्त्रयसत्वसारा
धीरोद्धता नमयतीव गतिर्धरित्रीम् ।
कौमारकेऽपि गिरिवद्गुरुतां दधानो
वीरो रसः किमयमैत्युत दर्प एव ॥ १९ ॥

लवः । (उपसृत्य) जयत्वार्यः ।

कुशः । नन्वायुष्मन् किमियं वार्ता युद्धयुद्धमिति ।

लवः । यत्किञ्चिदेतत् । दृप्तभावमुत्सृज्यार्योऽस्मिन् विनयेन वर्तताम् ।

कुशः । किमर्थम् ।

लवः । यदत्र देवो रघुपतिस्तिष्ठति । स च स्निह्यत्या-वयोरुत्कण्ठते च युष्मत्सन्निकर्षस्य ।

कुशः । (सतर्कम्) स रामायणकथानायको ब्रह्मघोषस्य[3] गोपायिता ।

लवः । अथ किम् ।

कुशः । आशंसनीयपुण्यदर्शनः स महात्मा किन्तु कथमस्माभिरुपगन्तव्य इति न संप्रधारयामि ।

---

१ दुष्टानाम् ।
२ दीप्तास्त्रस्फुरद् ।
३ ब्रह्मकोषस्य ।

Digitized by Google

लवः । यथागुरुस्तथोपचारेण ।

कुशः । अपि कथं नामैतत् ।

लवः । अत्युदात्तसुजनश्चन्द्रकेतुरौर्मिलेयः प्रियवयस्य इति सख्येन मामुपतिष्ठते तेन तत्संबन्धेन धर्मतात एवार्यं राजर्षिरिति ।

कुशः । संप्रत्यवचनीयो राजन्येऽपि प्रश्रयः ।

लवः । पश्यत्वेनमाकारानुभावगाभ्भीर्यसंभाव्यमानविविधलोकोत्तरचरितातिशयमार्यो महापुरुषम् ।

कुशः । (निर्वर्ण्य)

अहो प्रमोदिकं रूपमनुभावश्च पावनः ।
स्थाने रामायणकविर्देवीं वाचं व्यवीवृतत् ॥२०॥

(उपसृत्य) तात प्राचेतसान्तेवासी कुशोऽभिवादयते ।

रामः । एह्येहायुष्मन्

अमृताभ्मातजीमूतस्निग्धसंहननस्य ते ।
परिष्वङ्गस्यवात्सल्यादयमुत्कण्ठते जनः ॥ २१ ॥

(परिष्वज्य स्वगतम्) तत्किमपत्यमयं दारकः ।

अङ्गादङ्गाच्च्युत इव निजो देहजः स्नेहसारः
प्रादुर्भूय स्थित इव बहिश्चेतनाधातुरेव ।
सान्द्रानन्दक्षुभितहृदयप्रस्नवेनेव सृष्टो
गात्रं श्लेषे यदमृतरसस्रोतसा सिञ्चतीव ॥ २२ ॥

लवः । तात ललाटंतपो घर्मदीतिस्तदत्र सालच्छाये मुहूर्तमासनपरिग्रहं करोतु तातः ।

रामः । यदभिरुचितं वत्साय । (सर्वे परिक्रम्योपविशन्ति

---

१ संप्रति करणीयो ।
२ प्रासादिकम् ।
३ व्यवीवृतत् ।
४ अङ्गादङ्गात्सृत (स्नुत) इव निजः स्नेहजो देहसारः ।
५ प्रस्रवेणावमृष्टः । प्रस्रवेणेव सिक्तो ।
६ गात्रश्लेषे । गात्रश्लेषः स हि मम हिमश्रोतमाशंसतीव ।
७ ललाटंतपस्तपति घर्मांशुः ।

Digitized by Google

रामः (स्वगतम्)

अहो प्रश्रययोगेऽपि गतिस्थित्यासनादयः ।
साम्राज्यशंसिनो भावाः कुशस्य च लवस्य च २३
वपुरविहितसिद्धा एव लक्ष्मीविलासाः
प्रतिजनकमनीयं कान्तिमत्केतयन्ति ।
अमलिनमिव रत्नं रश्मयस्ते मनोज्ञा
विकसितमिवपद्मं बिन्दवो माकरन्दाः ॥ २४ ॥

भूयिष्ठां च रघुकुलकुमारच्छायामनयोः पश्यामि ।
कठोरपारावतकण्ठमेचकं
वपुर्वृषस्कन्धमबन्धुरांसकम् ।
प्रसन्नसिंहास्तिमितं च वीक्षितं
ध्वनिश्च माङ्गल्यमृदङ्गसंसलः ॥ २५ ॥

(सूक्ष्मं निरूप्य) अये न केवलमस्मदङ्गसंवादिन्याकृतिः ।
अपि जनकसुतायास्तच्च तच्चानुरूपं
स्फुटमिह शिशुयुग्मे नैपुणोन्मेयमस्ति ।
ननु पुनरिव तन्मे गोचरीभूतमक्ष्णो-
रभिनवशतपत्रश्रीमदास्यं प्रियायाः ॥ २६ ॥

मुक्ताच्छदन्तच्छविदन्तुरेयं सैवोष्ठमुद्रा स च कर्णपाशः ।
नेत्रे पुनर्यद्यपि रक्तनीले तथापि सौभाग्यगुणः स एव २७

तदेतत्प्राचेतसाध्युषितमरण्यं यत्र किल देवी परित्यक्ता । इयं चानयोराकृतिर्वपुश्च । यदपि स्वतः प्रकाशान्यत्राणीति तत्र विमृशामि । अपि खलु तच्चित्रदर्शनमा-

---

१ वपुरवियुतसिद्धा एव लक्ष्मीविलासाः
प्रतिकलकमनीयं कान्तिमुद्भेदयन्ति ।
अमलिनमिव चन्द्रं रश्मयः स्वे यथा वा
विकसितमरविन्दं बिन्दवो माकरन्दाः ॥

२ अबन्धुरांसयोः ।

३ सुन्दरेयम् ।

४ अनयोराकृतिर्वयोऽनुभावश्च ।

Digitized by Google

सांसिद्धिकमस्माभ्यनुज्ञानमद्भूतं स्यात् । नन्वसाम्प्रदायिकान्यस्त्राणि पूर्वेषामप्यनुशुश्रुम । अयं च संप्लवमानमात्मानं सुस्थातिशयो हृदयस्य मे विभ्रलम्भते । भूयिष्ठं च मया द्विधा प्रतिपन्नो देव्यागर्भिणीभाव आसीत् । (साक्षम्)

पुरारूढे स्नेहे परिचयविकासादुपचिते-
रहोविस्रब्धाया अपि सहजलज्जाजडतयः ।
मयैवादौ ज्ञातः करतलपरामर्शकलया
द्विधा गर्भग्रन्थिस्तदनु दिवसैः कैरपि तया ॥२८॥

(रुदित्वा) तत् किमेतौ पृच्छामि केनाप्युपायेन ।

लवः । तात किमेतत् ।

बाष्पवर्षेण नीतं वो जगन्मङ्गलमाननम् ।
अवश्यायावसिक्तस्य पुण्डरीकस्य चारुताम् ॥२९॥

कुशः । अयि वत्स

विना सीतादेव्या किमिव हि न दुःखं रघुपतेः
प्रियानाशे कृत्स्नं किल जगदरण्यं हि भवति ।
स च स्नेहस्तावानयमपि वियोगो निरवधिः
किमिखेवं पृच्छस्यनधिगतरामायण इव ॥ ३० ॥

रामः । (स्वगतम्) अये तटस्थित आलापः । कृतं प्रश्नेन । दग्धहृदय कोयमाकस्मिकस्ते स्नेहपरिप्लवो विकारः । एवं च निर्भिन्नहृदयावेगः शिशुजनेनाऽप्यनुकम्पितोऽस्मि । भवतु तावदन्तरयामि । (प्रकाशम्) वत्सौ रामायणमिति श्रूयते भगवतो वाल्मीकेः सरस्वतीनिष्यन्दः प्रशस्तिरादित्यवंशस्य । तत्र कौतूहलेन यत्किञ्चिच्छ्रोतुमिच्छामि ।

---

१ चित्रदर्शनप्रस्तावे ।
२ विस्रम्भयते ।
३ गर्भभारः ।
४ कृत्स्नं जगदिदमरण्यं ।
५ आकस्मिकस्ते परिप्लवो विकारः ।

Digitized by Google

कुशः । स कुरङ्ग एव सन्दर्भोऽङ्काक्षमावृत्तः । स्फुटमस्युपस्थितौ तावदिमौ बालचरितस्यान्त्येऽध्याये द्वौ श्लोकौ ।

रामः । उदीरयतु वत्सः ।

कुशः । प्रकृत्यैव प्रिया सीता रामस्यासीन्महात्मनः ।
प्रियभावः स तु तया स्वगुणैरेव वर्धितः ॥ ३१ ॥
तथैव रामः सीतायाः प्राणेभ्योऽपि प्रियोऽभवत् ।
हृदयं त्वेव जानाति प्रीतियोगं परस्परम् ॥ ३२ ॥

रामः । कष्टमतिदारुणोऽयं हृदयमर्मोद्घातः[1] । हा देवि एवं किल तदासीत् । अहो निरन्वयविपर्यासविरसवृत्तयो विप्रलम्भपर्यवसायिनस्तापयन्ति संसारवृत्तान्ताः ।

क्व तावानानन्दो निरतिशयविस्रम्भबहुलः
क्व तेऽन्योन्यं यत्नाः क्व[2] च नु गहनाः कौतुकरसाः
सुखे वा दुःखे वा क्व नु खलु तदैक्यं हृदययो-
स्तथाप्येष प्राणः स्फुरति न तु पापो विरमति॥३३॥

भोः कष्टम्

प्रियागुणसहस्राणामेकोन्मीलनपेशलः ।
य एव दुःस्मरः कालस्तमेव स्मारिता वयम् ।३४।
तदा किञ्चित् किञ्चित् कृतपदमहोभिः कतिपयै-
स्तदीषद्विस्तारिस्तनयुगलमासीन्मृगदृशः ।
वयःस्नेहाकूतव्यतिकरघनो यत्र मदनः ।
प्रगल्भव्यापारः स्फुरति हृदि मुग्धश्च वपुषि॥३५॥

कुशः । अयं च मन्दाकिनीचित्रकूटवनविहारे सीतादेवीमुद्दिश्य रघुपतेः श्लोकः ।

स्वदर्थमिव विन्यस्तः शिलापादोऽयमग्रतः[3] ।
यस्यायमभितः पुष्पैः प्रवृष्ट इव केसरः ॥ ३६ ॥

---

१ कष्टमतिदारुणो हृदय मर्मोपघातः ।
२ क्व चन ।
३ शिलापट्टः ।

Digitized by Google

रामः । (सलज्जितस्नेहकरुणम्) अति नामायं मुग्धः शिशुजनो विशेषतस्त्वरण्यचरः । हा देवि स्मरसि वा तस्य प्रदेशस्य तत्समयविश्रम्भातिप्रसङ्गस्य । कष्टं भोः कष्टम्

श्रमाम्बुशिशिरीभवत् प्रसृतमन्दमन्दाकिनी-
मरुत्तरलितालकाकुललललाटचन्द्रद्युति ।
अकुङ्कुमकलङ्कितोज्वलकपोलमुत्प्रेक्ष्यते
निराभरणसुन्दरश्रवणपाशसौम्यं मुखम् ॥ १७ ॥

(स्तम्भित इव स्थित्वा सकरुणम्) अहो नु खलु भोः

चिरं ध्यात्वा ध्यात्वा निहित इव निर्माय पुरतः
प्रवासेऽप्याश्वासं न खलु न करोति प्रियजनः ।
जगज्जीर्णारण्यं भवति हि विकल्पव्युपरमे
कुकूलानां राशौ तदनु हृदयं पच्यत इव ॥ १८ ॥

(नेपथ्ये)

वसिष्ठो वाल्मीकिर्दशरथमहिष्योऽथ जनकः
सहैवारुन्धत्या शिशुकलहमाकर्ण्य सभयाः ।
जराग्रस्तैर्गात्रैरथ खलु विदूराश्रमतया
चिरेणागच्छन्ति त्वरितमनसोऽपि श्रमजडाः ॥ १९ ॥

रामः । कथं भगवन्तावरुन्धतीवसिष्ठौ । अम्बा जनकश्चात्रैव । कष्टं कथं खल्वेते द्रष्टव्याः । (सकरुणं विलोक्य) अहह तातजनकस्तु दैवादत्रैवायात इति वज्रेण ताडितोऽस्मि मन्दभाग्यः ।

सम्बन्धस्पृहणीयताप्रमुदितैर्जुष्टे वसिष्ठादिभि-
र्दृष्ट्वापत्यविवाहमङ्गलमहे तत्तातयोः संगतम् ।

---

१ मुग्धं ।
२ कलत्रव्युपरमे ।
३ त्वरितगतयो विश्लथजडाः ।
४ प्रमुदितै र्जुष्टेवसिष्ठादिभि-
र्दृष्ट्वापत्यविवाहमङ्गलमहो ।

Digitized by Google

पश्यन्नीदृशमीदृशो पितृसखं वृत्तं महा वैशसे
दीर्यें किं न सहस्रधाहमथवा रामेण किं दुष्करम् ॥४०

(नेपथ्ये)

कष्टं कष्टम्

अनुभावमात्रसमुपस्थिताश्रियं
सहसैव वीक्ष्य रघुनाथमीदृशम् ।
प्रथमप्रमूढजनकप्रबोधनाद्
विधुराः प्रमोहमुपयान्ति मातरः ॥ ४१ ॥

रामः । हा तात हा मातरः हा जनक

जनकानां रघूणां च यत् कृत्स्नं गोत्रमङ्गलम् ।
तस्मिन्नकरुणे पापे वृथा वः करुणा मयि ॥४२॥

यावत्संभावयामि । (इत्युत्तिष्ठति)

कुशलवौ । इत इतस्तातः । (सकरुणाकुलं परिक्रम्य निष्क्रान्ताः सर्वे) ।

कुमारप्रत्यभिज्ञानो नाम
षष्ठोऽङ्कः ।

(ततः प्रविशति लक्ष्मणः)

लक्ष्मणः । भो भो भगवता खलु वाल्मीकिना सब्रह्मक्षत्रपौरजानपदाः प्रजाः सहास्माभिराहूय कृत्स्न एव सदेवासुरतिर्यगुरगनायकनिकायो जङ्गमः स्थावरश्च भूत-

---

१ समवस्थिताश्रियम् ।
२ अद्य खलु भगवता वाल्मीकिना ।
३ सदेवासुरतिर्यगुरगनायकनिकायसन्तानः सचराचरो भूतग्रामः ।
मर्त्यामर्त्यसदेवासुरमनुष्यतिर्यगुरगनायकनिकायसन्तानश्च जङ्गमो भूतग्रामः ।

Digitized by Google

ग्रामः स्वप्रभावेण सन्निधापितः । आदिष्टश्चाहमार्येण वत्स लक्ष्मण भगवता वाल्मीकिना स्वकृतिमप्सरोभिः प्रयुज्यमानां द्रष्टुमुपनिमन्त्रिताःस्मः । तद्गङ्गातीरमातोद्यस्थानमुपगम्य क्रियतां समाजसन्निवेश इति । कृतं च मर्त्यामर्त्यस्य भूतग्रामस्य समुचितस्थानेषु समुपवेशनं मया । अयं तु

राज्याश्रमनिवासेऽपि प्राप्तकष्टमुनिव्रतः ।
वाल्मीकिगौरवादार्य इत एवाभिवर्त्तते ॥ १ ॥

(ततः प्रविशति रामः)

रामः । वत्स लक्ष्मण अपि स्थिता रङ्गप्रेक्षकाः ।

लक्ष्मणः । अथ किम् ।

रामः । इमौ पुनर्वत्सौ कुशलवौ चन्द्रकेतुसदृशौ स्थानप्रतिपत्तिं लम्भयितव्यौ ।

लक्ष्मणः । प्रभुस्नेहप्रसयात्तथैव कृतम् । इदं त्वास्तीर्णं राजासनमुपविशत्वार्यः ।

रामः । (उपविशति । सर्वे चोपविशन्ति)

लक्ष्मणः । प्रस्तूयतां भोः ।

(प्राविश्य)

सूत्रधारः । भो भो भगवान् भूतार्थवादी प्राचेतसः सजङ्गमस्थावरं जगदाज्ञापयति यदिदमस्माभिरार्षेण चक्षुषा समुद्वीक्ष्य पावनकरुणाद्भुतरसं किञ्चिदुपनिबद्धं तत्र कार्यगौरवादवधातव्यमिति ।

रामः । एतदुक्तं भवति । साक्षात् कृतधर्माण ऋषयः तेषाममृतसाराणि भगवतां परोरजांसि प्रज्ञानानि न क्वचिदव्याहन्यन्त इत्यनभिशङ्कनीयानीति ।

---

१ तद्भागीरथीतीरमनोज्ञस्थानं ।
२ कृतश्च ।
३ समुपचितस्थानसंनिवेशः । समुपवेशसङ्गो ।
४ पावनं च करुणाद्भुतरस च । पावनं वचनामृतं करुणाद्भुतरसम् ।

Digitized by Google

(नेपथ्ये)

हा अज्जउत्त हा कुमार लक्खण एआइणिं मन्दभाइणिं असरणं अरण्णे आसण्णप्पसववेअणं हदासा सावदामं अहिलसन्ति । सांहं दाणिं मन्दभाइणी भाईरहीए अत्ताणं णिक्खिविस्सं (हा आर्यपुत्र हा कुमार लक्ष्मण एकाकिनीं मन्दभागिनीमशरणामरण्य आसन्नप्रसववेदनां हताशाः श्वापदामामभिलषन्ति । साहमिदानीं मंदभागिनी भागीरथ्यामात्मानं निक्षेप्स्यामि) ।

लक्ष्मणः । (आत्मगतम्) कष्टं बतान्यदेव किमपि ।

सूत्रधारः । विश्वम्भरात्मजा देवी राज्ञा त्यक्ता महावने।
प्राप्तप्रसवमात्मानं गङ्गादेव्यां विमुञ्चति ॥ २ ॥

(इति निष्क्रान्तः)

रामः । देवि[2] क्षणमपेक्षस्व ।

लक्ष्मणः । आर्य नाटकमिदम् ।

रामः । हा देवि दण्डकारण्यवासप्रियसखि एष ते रामादेवदुर्विपाकः ।

लक्ष्मणः । आर्य दृश्यतां तावत् प्रबन्धार्थः ।

रामः । एष सज्जोस्मि वज्रमयः ।

(ततः प्रविशत्युत्सङ्गितैकैकदारकाभ्यां पृथ्वीगङ्गाभ्यामवलम्बिता सीता)

रामः । वत्स लक्ष्मण असंविज्ञातमनिबन्धनं तमः[3] इव प्रविशामि । धारय माम् ।

देव्यौ । समाश्वसिहि कल्याणि दिष्ट्या वैदेहि वर्धसे।
अन्तर्जलं प्रसूतासि रघुवंशधरौ सुतौ ॥ २ ॥

---

१ हा दाणिं (हा इदानीं) ।
२ हा देवि हा देवि । लक्ष्मण अवेक्षस्व ।
३ अन्धतमसमिव प्रविशामि ।
४ गङ्गा.

Digitized by Google

सीता । (समाश्वस्य) दिट्ठिआ दारए पसुदाणि । हा अज्जउत्त । (इति मूर्च्छति)

लक्ष्मणः । (पादयोर्निपत्य) आर्य आर्य दिष्ट्या वर्धामहे । कल्याणप्ररोहो रघुवंशः । (विलोक्य) हा हा कथ मुभिंतबाष्पोत्पीडनिर्भरः प्रमुग्ध एवार्यः । (इति वीजयति)

पृथ्वी । वत्से समाश्वसिहि समाश्वसिहि ।

सीता । (आश्वस्य) भअवदि का तुमं इअं अ (भगवति का त्वमियं च) ।

पृथ्वी । इयं ते श्वशुरकुलदेवता भागीरथी ।

सीता । भअवदि णमो दे णमो दे (भगवति नमस्ते नमस्ते) ।

भागीरथी । चारित्रोपैचितां कल्याणसम्पदमनुगच्छ ।

लक्ष्मणः । अनुगृहीताः स्मः ।

भागीरथी । इयं तु जननी ते वसुन्धरा ।

सीता । हा अम्ब ईदीसी अहं तुए दिट्ठा (हा अम्ब ईदृश्यहं त्वयादृष्टा) ।

पृथ्वी । एहि वत्से एहि पुत्रि (इति सीतामालिङ्ग्य मूर्च्छति)

लक्ष्मणः । (सहर्षम्) दिष्ट्या पृथ्वीगङ्गाभ्यामभ्युपपन्नार्या ।

रामः । (अवलोक्य) करुणतरं खल्वेतत् वर्तते ।

भागीरथी । विश्वंभरापि नाम व्यथत इति जितमपत्य-

---

१ बाष्पोद्वेदनिर्भरः ।

२ चारित्रोचिताम् ।

३ रामः । करुणतरं खल्वेतद्वर्तते । विश्वंभरापि नाम व्यथत इति जितमपत्यस्नेहन । यद्वा सर्वसाधारणो ह्येष मोहग्रन्थिरन्तर्धरश्चेतनावतामनुपप्लवः संसारतन्तुः ।
भागीरथी । वत्से वैदेहि दोर्वि भूतधात्रि समाश्वासिहि ।

Digitized by Google

स्नेहेन । यद्वा सर्वसाधारणो[1] ह्येष मोहग्रन्थिरन्तश्चरश्चेतनावतामनुपप्लवः संसारतन्तुः । वत्से वैदेहि देवि भूत्रधात्रि समाश्वसिहि ।

पृथ्वी । देवि सीतां प्रसूय कथमाश्वसिमि ।

एकश्चिरं राक्षसमध्यवासः
सागो[2][3] द्वितीयश्च सुदुःसहोत्स्याः ।

भागीरथी । को नाम पाकाभिमुखस्य जन्तो-
र्द्वाराणि दैवस्य पिधातुमीष्टे ॥ ४ ॥

पृथ्वी । भागीरथि सदृशमुक्तम् । युक्तमेतद्वा रामभद्रस्य ।

न प्रमाणी कृतः पाणिर्बाल्ये[4] बालेन पीडितः ।
नाहं न जनको नाग्निर्नानुवर्तिन सन्ततिः ॥ ५ ॥

सीता । अज्जउत्तं सुमराविद म्हि (आर्यपुत्रं स्मारितास्मि) ।

पृथ्वी । आः कस्तवार्यपुत्रः ।

सीता । (सलज्जास्मम्) जहा वा अम्बा भणादि (यथा वाऽम्बा भणति) ।

रामः । अम्ब पृथिव ईदृशोऽस्मि ।

भागीरथी । भगवति वसुन्धरे शरीरमसि संसारस्य । तत्किमसंविदानेव जामात्रे कुप्यसि[5] ।

घोरं लोके विततमयशो या च वह्नौ विशुद्धि-
र्लङ्काद्वीपे कथमिव जनस्तामिह श्रद्धधातु ।
इक्ष्वाकूणां कुलधनमिदं यत्समाराधनीयः
कृत्स्नो लोकस्तदतिगहनं किं स वत्सः करोतु ॥६॥

---

१ सर्वसाधारणो ह्येष मानसो गूढमोहग्रन्थिरान्तरश्चेतनावतां सोपप्लवः संसारतन्तुः ।
२ सोढः ।
३ साङ्गो द्वितीयश्च सुदुःश्रवोस्याः ।
४ बाल्ये योऽसौनिपीडितः ।
५ तात्किमित्यजानतीव ।

Digitized by Google

लक्ष्मणः । अव्याहतान्तः प्रकाशा हि देवता भूतेषु विशेषेण गङ्गा । तदयमञ्जलिस्ते ।

रामः । अम्ब अनुवृत्तस्त्वया भगीरथगृहे[2] प्रसादः ।

पृथ्वी । देवि नित्यं प्रसन्नास्मि वः । किन्त्वापातदुःसहस्नेहावेगेनैवं ब्रवीमि । न पुनर्न जानामि सीतास्नेहं रामभद्रस्य ।

दह्यमानेन मनसा दैवाद्वत्सां विहाय सः ।
लोकोत्तरेण सत्वेन[4] प्रजापुण्यैश्च जीवति ॥ ७ ॥

रामः । सकरुणा हि गुरवो गर्भरूपेषु ।

सीता (रुदति कृताञ्जलिः) णेदू मं अत्तणो अङ्केसु विलअं अम्बा (नयतु मामात्मनोऽङ्केषु विलयमम्बा)।

रामः । किमन्यद्ब्रवीतु ।

भागीरथी । शान्तम्[5] । अविलीना संवत्सरसहस्रं भूयाः ।

पृथ्वी । वत्से अपि रक्षणीयौ ते पुत्रकौ ।

सीता । अणाधाह्मि (अनाथास्मि) ।

रामः । हृदय मज्रमयमसि ।

भागीरथी । कथं त्वं सनाथाप्यनाथा ।

सीता । कीदिसं मम अभग्गाए सणाधत्तणं (कीदृशं ममाभाग्यायाः सनाथत्वम्)।

देव्यौ । जगन्मङ्गलमात्मानं कथं त्वमवमन्यसे ।
आवयोरपि यत्संगात् पवित्रत्वं प्रकृष्यते ॥८॥

---

१ तदेष तेऽञ्जलिः ।
२ भगीरथकुले ।
३ किन्त्वापातदुःसहशोकावेगोऽपत्यस्य ।
४ धैर्येण ।
५ शान्तम् । अविलीना वत्सरसहस्राणि भूयाः ।
आः शान्तम् । किं ब्रवीषि । अविलीना इ० ।

Digitized by Google

लक्ष्मणः । आर्य श्रुतम् ।

रामः । शृणोतु लोकः । (नेपथ्ये कलकलः)

रामः । अद्भुततरं किमपि ।

सीता । किं त्ति अन्तरिक्खं पज्जलदि (किमित्यन्तरिक्षं प्रज्वलति) ।

देव्यौ । ज्ञातम् ।

कुशाश्वः कौशिको राम इति येषां गुरुक्रमः ।
आविर्भवन्ति[3] तान्येव शस्त्राणि सह जृम्भकैः ॥९॥

(नेपथ्ये)

देवि सीते नमस्तेऽस्तु गतिर्नः पुत्रकौ हि ते ।
आलेख्यँ दर्शने देवो यदाह[4] रघुनन्दनः ॥१०॥

सीता । दिट्ठिआ अत्थदेअदाओ परिप्फुरन्ति[5] (दिष्ट्या अस्त्रदेवताः परिस्फुरन्ति) ।

लक्ष्मणः । उक्तमासीदार्येण सर्वथेदानीं त्वत्प्रसूतिमुपस्थास्यन्तीति ।

देव्यौ । नमो वः परमास्त्रेभ्यो धन्याः स्मो वः परिग्रहात् ।
अनुध्यातैरुपेतव्यं वत्सयोर्भद्रमस्तु वः ॥ ११ ॥

रामः । क्षुभिताः कामपि दशां कुर्वन्ति मम सांप्रतम् ।
विस्मयानन्दसन्दर्भजर्जराः करुणोर्मयः ॥१२॥

---

१ आर्य श्रूयताम् ।

२ किं त्ति आबद्धकलकलं जलदि विअ अन्तरिक्खं (किमित्याबद्धकलकलं ज्वलतीवान्तरिक्षम्) ।

३ प्रादुर्भवन्ति ।

४ आलेख्यदर्शनादेव यथाह रघुनन्दनः ।

आलेख्यदर्शनादेव ययोर्दाता रघूद्वहः ।

५ दिट्ठिआ अत्थेदअदाओ एदाओ । हा अज्जउत्त अज्ज वि दे पसादो प्फुरन्ति (दिष्ट्या अस्त्रदेवता एताः । हा आर्यपुत्र अद्यापि ते प्रसादाः प्रस्फुरन्ति) ।

Digitized by Google

देव्यौ । मोदस्व वत्से रामभद्रतुल्यावितानीं ते पुत्रकौ संवृत्तौ ।

सीता । भअवदीओ को एदाणं क्खतिओचिदं कम्म करिस्सादि (भगवत्यौ क एतयोः क्षत्रियोचितं कर्म करिष्यति ।)

रामः । एषा वसिष्ठगुप्तानां रघूणां वंशवर्धिनी ।
कष्टं सीतापि सुतयोः संस्कर्तारं न विन्दति ॥१३॥

देव्यौ । पुत्रि किं तवानया चिन्तया । एतौ हि वत्सौ स्तन्यत्यागात् परेण भगवतो वाल्मीकेरर्पयिष्यावः । स एतयोः क्षत्रकृत्यं करिष्यति ।

यथा वसिष्ठाङ्गिरसावृषी प्राचेतसस्तथा ।
रघूणां जनकानां च वंशयोरुभयोर्गुरुः ॥१४॥

रामः । सुविचिन्तितं भगवतीभ्याम् ।

लक्ष्मणः । आर्य सत्यं विज्ञापयामि तैस्तैरुपायैर्वत्सौ कुशलवावुत्प्रेक्षे ।

एतौ हि जन्मसिद्धास्त्रौ जातौ प्राचेतसान्मुनेः ।
वीरौ संप्राप्तसंस्कारौ वयसा द्वादशाब्दिकौ ॥१५॥

रामः । वत्से इत्येवाहं परिप्लवमानन्दहृदयः संप्रमुग्धोऽस्मि ।

पृथ्वी । एहि वत्से पवित्रीकुरु रसातलम् ।

रामः । हा प्रिये लोकान्तरमसि गता ।

सीता । णेदु मं अत्तणं अङ्केसु विलअं अम्बा । ण सक्कोमि ईदिसं जीअलोअ परिवत्तं अणुभविदुं (नयतु मामात्मनोऽङ्केषु विलयमम्बा । न शक्तास्मि ईदृशं जीवलोकपरिवर्तमनुभवितुम्) ।

---

१ मन्यस्व । रमस्व

२ वत्सइति परिप्लवमान हृदयः सन् मुग्धोऽस्मि । अति परिप्लवमानन्दहृदयः संप्रमुग्धोऽस्मि ।

Digitized by Google

रामः । किमुत्तरं स्यात् ।

पृथ्वी । स्तन्यत्यागं यावन्मन्त्रियोगतः पुत्रकयोरपेक्षस्व-परेण ते यथा रोचिष्यते ।

गङ्गा । एवं नाम । (ततो निष्क्रान्ता गङ्गापृथ्वीसीताः)

रामः । कथं विलय एव वैदेह्याः सम्पन्नः । हा देवि दण्डकारण्यवासप्रियसखि हा चारित्रदेवते लोकान्तरं पर्यवसिताऽसि[1] । (इति मुह्यति)

लक्ष्मणः । भगवन् वाल्मीके परित्रायस्व । एष ते काव्यार्थः[2] । (नेपथ्ये)

अपनीयतामातोद्यकम् । भो भोः सजङ्गमस्थावराः प्राणभृतो मर्त्यामर्त्याः पश्यत महर्षिणा भगवता वाल्मीकिनाभ्यनुज्ञातं पवित्रमाश्चर्यम् ।

लक्ष्मणः । (विलोक्य)

मन्थादिव क्षुभ्यति गाङ्गमम्भो
व्याप्तं च देवैरिदमन्तरिक्षम्[3] ।
आश्चर्यमार्या सह देवताभ्यां
गङ्गामहीभ्यां सलिलादुदेति[4] ॥१६॥

(पुनर्नेपथ्ये) अरुन्धति जगद्वन्द्ये गङ्गापृथ्व्यौ जुषस्व[5] नौ ।
अर्पितेयं तवावाभ्यां सीता पुण्यव्रता वधूः ॥ १७ ॥

लक्ष्मणः । अहो आश्चर्यमाश्चर्यम् । आर्य पश्य पश्य । कथमद्यापि नोच्छ्वसित्यार्यः ।

(ततः प्रविश्यारुन्धती सीता च)

अरुन्धती । त्वरस्व वत्से वैदेहि मुञ्च शालीनशीलताम् ।
एहि जीवय मे वत्सं प्रियस्पर्शेन पाणिना ॥ १८ ॥

---

१ पर्यवस्थितासि ।
२ एष किं ते काव्यार्थः ।
३ देवर्षिभिरन्तरिक्षम् ।
४ सलिलादुपैति ।
५ भजस्व ।

Digitized by Google

सीता । (ससंभ्रमं स्पृशन्ती) समस्ससिदु अज्जउत्तो (समाश्वसित्वार्यपुत्रः) ।

रामः । (समाश्वस्य सानन्दम्) भोः किमेतत् । (दृष्ट्वा-सहर्षाद्भुतं) कथं देवी । (सलज्जम्) अम्बारुन्धती सर्वे च प्रहृष्यन्त ऋष्यशृङ्ग शान्तासमेता गुरवः ।

अरुन्धती । वत्स एषा भगीरथगृहदेवता सुप्रसन्ना गङ्गा ।

(नेपथ्ये) जगत्पते रामचन्द्र स्मर्यतामालेख्यदर्शने मां प्रत्यात्मनो वचनम् । यथा सा त्वमम्ब स्नुषायामरुन्धतीव सीतायां शिवानुध्यानपरा भवेति । तत्रानृणास्मि जाता ।

अरुन्धती । इयं ते श्वश्रूर्भगवती वसुन्धरा ।

(नेपथ्ये) उक्तं च पूर्वमायुष्मता वत्सात्यागे । यथा भगवति वसुन्धरे श्लाघ्यां दुहितरमवेक्षस्व जानकीमिति । तदधुना कृतवचनास्मि तत्प्रभोर्वत्सस्येति ।

रामः । कथं कृतमहापराधो भगवतीभ्यामनुकम्पितः । प्रणमामि[2] वः ।

अरुन्धती । भो भोः पौरजानपदाः भगवतीभ्यां जान्हवीवसुन्धराभ्यामेवं प्रशस्यमाना ममारुन्धत्याः समर्पिता पूर्वं च भगवता वैश्वानरेण निर्णीतपुण्यचारित्रा सप्तस्व कैश्वदेवैः संस्तुता सावित्रकुलवधूर्देवयजनसंभवा सीतादेवी परिगृह्यतामिति[4] कथं भवन्तो मन्यन्ते ।

लक्ष्मणः । एवमार्यारुन्धत्या निर्भर्सिताः प्रजाः कृत्स्नश्च भूतग्राम आर्यां नमस्करोति । लोकपालश्च सप्तर्षयश्च पुष्पवृष्टिभिरुपतिष्ठन्ते ।

---

१ अये देवी अरुन्धती सर्वे च प्रहृष्यदृष्यशृङ्गशान्तासमेता गुरवः

२ (इति प्रणमति) ।

३ इयमधुना भगवतीभ्यां जाह्नवीवसुन्धराभ्यामेवं प्रशस्य ममारुन्धत्याः समर्पिता।

४ परिगृह्यत इति ।

Digitized by Google

अरुन्धती । जगत्पते । रामचन्द्र ।

नियोजय यथाधर्मं प्रियां त्वं धर्मचारिणीम् ।
हिरण्मय्याः प्रतिकृतेः पुण्यप्रकृतिमध्वरे ॥१९॥

सीता । (स्वगतम्) जाणादि अज्जउत्तो सीदादुक्खं पमज्जिदुं (जनात्यार्यपुत्रः सीतादुःखं प्रमार्जयितुम्) ।

रामः । यथा भगवत्यादिशति ।

लक्ष्मणः । कृतार्थोऽस्मि ।

सीता । जीविदाम्हि (जीवितास्मि) ।

लक्ष्मणः । आर्ये एष निर्लज्जो लक्ष्मणः प्रणमति ।

सीता । वच्छ ईदिसो वि चिरंजीव (वत्स ईदृशोऽपि चिरंजीव) ।

अरुन्धती । भगवन् वाल्मीके उपनीयेतामिमौ सीतागर्भसंभूतौ रामभद्रस्य पुत्रकौ कुशलवौ ।

(इति निष्क्रान्ता)

रामलक्ष्मणौ । दिष्ट्या तथैव तत् ।

सीताः । (सबाष्पाकुला) कहिं ते पुत्रका मे (कुत्र तौ पुत्रकौ मे) ।

(ततः प्रविशति वाल्मीकिः कुशलवौ च)

वाल्मीकिः । वत्सौ कुशलवौ एष रघुपतिः पिता युवयोर्लक्ष्मणः कनिष्ठतातः सीतादेवी जनन्येष राजर्षिर्जनको मातामहः ।

सीता । (सहर्षकरुणाद्भुतं विलोक्य) कहं तादो (कथं तातः) ।

कुशलवौ । हा तात हा अम्ब हा मातामह ।

---

१ (रामलक्ष्मणौ दृष्ट्वा) तथैव तत् ।

Digitized by Google

रामलक्ष्मणौ । (सहर्षमालिङ्ग्य) ननु वत्सौ पुण्यैः प्राप्तौस्थः ।

सीता । एहि जाद कुस एहि जाद लव चिरस्स परिस्सजध पुणो जम्मन्तरगदं जणणिं (एहि जात कुश एहि जात लव चिरस्य परिष्वजेथां जन्मान्तरगतां जननीं)।

कुमरौ । (तथा कृत्वा) धन्यौ स्वः ।

सीता । भअवं पणमामि (भगवन् प्रणमामि) ।

वाल्मीकिः । वत्से ईदृश्येव चिरं भूयाः ।

